वर्षम् 74
अङ्कः -11
भाद्रपदमासः
विक्रमाब्दः 2081
युगाब्दः 5126
सितम्बर, 2024

ISSN 2249-698X

# भारती
## संस्कृत-मासपत्रिका

एकस्याः प्रतेः २५/-
वार्षिक-शुल्कम् २५०/-
पञ्चवार्षिकशुल्कम् ११००/-
पञ्चदशवार्षिकशुल्कम् ३१००/-

प्रकाशन प्रत्येक माह की 1 तारीख



पं. दीनदयाल उपाध्यायः
२५ सितम्बर १९१६ - ११ फरवरी १९६८

जयन्तीदिवसे राष्ट्रसेवायाः परिपोषकः।
उपाध्यायः कृती दीनदयालः स्मर्यते जनैः।।

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | भारतीयसंस्कृतौ शिक्षकगुणाः | डॉ. मुकेश जैनः | ७ |
| ३ | स्वतन्त्रतायास्तात्पर्यम् | डॉ. महेशचन्द्रशर्मा गौतमः | १३ |
| ४ | भारतम् अर्थात् | डॉ. प्रीतिः पुजारा | १६ |
| ५ | रचनाभ्युदयमहाकाव्ये कथावस्तुविवेचनम् | नाथूरामसैनी | १७ |
| ६ | सङ्घे शक्तिः कलौ युगे | डॉ. पवनकुमारशर्मा | २३ |
| ७ | संस्कृतसमाचाराः | प्रोफेसर- राजेशकुमारः | २४ |
| ८ | पुस्तकसमीक्षा | महामहोपाध्यायदेवर्षिकलानाथशास्त्री | २६ |
| ९ | श्रीराम-जानकी-स्तवनम् | प्रो. डॉ. योगिनी एच. व्यासः | २७ |
| १० | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २८ |
| ११ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३० |


लेखकेभ्यो निवेदनम् - कृपया स्वलेखान् 'चाणक्य Font' द्वारा टंकयित्वा अशुद्धिसंशोधनं च कृत्वा 'PDF' एवं 'Word' द्वारा प्रेषयन्तु।
ग्राहकेभ्यो निवेदनम् - किसी मास का अंक दिनाङ्क 10 तक प्राप्त न हुआ हो तो कृपया Whatsapp द्वारा चलदूरभाष सं. 93520 30291, 8005813613 (व्यवस्थापक) पर अपने नाम, पते सहित सूचना करें।

### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9799011085**

(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठम्, सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठम् रेवासा )
महन्तः प्रतापपुरी
( तारातरामठम्, बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्
प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री
सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा
प्रबन्धसम्पादकः
सुदामा शर्मा
सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी
सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्
अध्यक्षः
प्रोफेसर बनवारीलालगौडः
उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः
सचिवः
डॉ. सुधीरकुमारशर्मा
सहसचिवः
कृष्णकुमारशर्मा
व्यवस्थापकः
राजीवदाधीचः
9352030291

केन्द्रीय संस्कृत विश्वविद्यालय ( शिक्षा मंत्रालय, भारत सरकार के अधीन ) के द्वारा संस्कृत पुस्तकों के प्रकाशनार्थ वित्तीय सहायता की योजना के तहत प्रदत्त वित्तीय सहायता से प्रकाशित।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 74 अङ्कः -11
भाद्रपदमासः
विक्रमाब्दः 2081
युगाब्दः 5126
सितम्बर, 2024

एकस्याः प्रतेः 25/-
वार्षिकशुल्कम् 250/-
पञ्चवार्षिकशुल्कम् 1100/-
आजीवनसदस्यताशुल्कम् 3100/- ( 15 वर्षाणि )

सम्पादकीयम्

# उपाध्यायो दयालुश्च दीनानामुपकारकः

(पं. दीनदयाल उपाध्यायः) ...✍ प्रोफेसर श्रीकृष्णशर्मा

बालानां लालन-पालन विषयिणी सदुक्तिरेका प्रसिद्धा -

**'लालयेत् पञ्च वर्षाणि ताडयेद् दशवर्षतः।**
**प्राप्ते तु षोडशे वर्षे पुत्रं मित्रमिवाचरेद् '**। इति।

अभिभावकाः बालानां पञ्चवर्षप्राप्तिपर्यन्तानां सम्यक् लालनं पालनं वा कुर्युः। 'लल' धातुरीप्सार्थकः। आप्तुमिच्छा 'ईप्सा' भवति। बालो यदिच्छति तत् तस्मै दातव्यमिति लालनम्भवति। पञ्च-वर्षोपरि दश-वर्ष प्राप्तायुषो बालकस्य लालनपपालनपूर्वकं ताडनमपि कुर्युः। ताडनम् अर्थात् संस्कारप्रदानम्, न तु बलाघातः। यथोक्तं मनुस्मृतौ (5.51)-

**'संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः'** इति।

अत्र 'घातक' शब्दस्त्रिष्वर्थे प्रयुक्तस्तत्रैकोऽर्थः 'संस्कर्ता' इत्यपि। अतश्चोक्तं हलायुधकारोऽपि -

**'इन्दुः कुमुदहन्ता च सूर्यः कमलघातकः'** इति।

अत्र कमलघातकोऽर्थात् कमलसंस्कारक इत्यर्थः। प्राप्ते तु षोडशे वर्षे बालकं मित्रमिवाचरेयुरभिभावकाः। इदानीं स परिपक्वमतिर्भवति, स्वनिर्णये समर्थ इति यावत्।

अत्रायं प्रसङ्गः। भारतीय-जनसंघस्याध्यक्षचरः पण्डित-दीनदयाल-उपाध्यायो यो भारतीयजनसंघे राष्ट्रिय-जीवनदर्शनस्य निर्माता मन्यते, कीदृशन्तस्य लालनं-पालनं-ताडनं-मित्रवदाचरणप्राप्तित्वमिति? वर्षत्रयवयसि पितुर्भगवतीप्रसाद-उपाध्यायस्य निधनम्, अष्टवर्षम्प्राप्तस्य ०८.०८.१९२४ दिनांके पालिकायाः 'रामप्यारी' ति नाम्न्या मातुर्निधनम्। अस्य मातामहः पं. श्री- चुन्नीलालशुक्लो राजस्थाने जयपुरनिकटे 'धानक्या' 'रेलवे स्टेशन' इत्यत्र 'स्टेशन मास्टर' पदे नियुक्त आसीत्। अत्रैव पं. दीनदयाल उपाध्यायस्य १९७३ वैक्रमाब्दे आश्विनमासे शुभे कृष्णे पक्षे त्रयोदश्यां तिथौ तदनुसारं 25 सितम्बर 1916 दिनांके मातामहगृहे जनिरभूत्, परं दौर्भाग्यात् 1926 तम ईशवीयाब्दे मातामहो दिवम्प्रयातः। खीष्टाब्दस्य 1931 तमे वर्षे मातुली, 1933 तमे वर्षे मातामही, 18. 11. 1934 तमे दिनांके अनुजः शिवदयालुरपि दिवम्प्रयातः। सर्वस्वमपहृतं विधात्रा । 'लालयेत् पञ्च वर्षाणी' त्यादिसदुक्तिस्तु पुस्तकस्थैव सुशोभिताऽभूत् पण्डित-दीनदयालोः कृते। अस्तु ।

'लिखितमपि ललाटे प्रोज्झितुं कः समर्थः' इति सम्यगवबुद्ध्य 'मदायत्तन्तु पौरुषम्' इति च मत्वा लोकयात्रायां प्रावर्तत पण्डितः। जन्मभूमौ राजस्थाने सीकर जनपदे श्री कल्याण हाई स्कूलतः 'माध्यमिक शिक्षा बोर्ड, अजमेर' इत्यस्य 'मैट्रिक' परीक्षां स्वर्णपदकं प्राप्योत्तीर्णवान् 'पिलानी' नगरतश्च

प्रथमश्रेण्यामेव 'इण्टर' परीक्षामपि। अतः परं सनातनधर्मकॉलेज-कानपुरतः (उत्तरप्रदेशात्) प्रथमश्रेण्यामेव B.A. परीक्षामथ च प्रयागतः B.T. परीक्षामप्युदतरत्।

राष्ट्रीय-स्वयंसेवकसङ्घेन सम्पर्कः 1937 तम ईशवीयाब्दे B.A. कक्षायामध्ययनावसरे कानपुरनगरे 'भाँऊराव देवरस' महोदयस्य माध्यमेनाभवत्। तदानीमेव डॉ. केशव बलिराम हेडगेवारमहोदयानामपि सम्पर्को जातः। 1942 तमे वर्षे उत्तरप्रदेशस्य लखीमपुरजनपदस्यायं पण्डितो राष्ट्रीयस्वयंसेवकसंघस्य प्रचारकत्वेन नियुक्तः संजातोऽचिरादेवोत्तरप्रदेशस्य सह-प्रान्तप्रचारकोऽभूत्। सोत्साहमयं दीनदयालुः 21 सितम्बर, 1951 दिनांके 'लखनऊ' नगरे प्रादेशिकं सम्मेलनं समायोज्य **'उत्तरप्रदेश-जनसङ्घ'** इत्यस्य स्थापनामकरोत्। अग्रिमे मासे 21 अक्टूबर, 1951 दिनांके डॉ. श्यामाप्रसादमुखर्जी-महोदयानां नेतृत्वे दिल्ली-राजधान्यां **'अखिल-भारतीय-जनसंघ'** इत्यस्य संस्थापना सञ्जाता। 1952 तमेऽब्दे कानपुर-नगरे प्रथम-महाधिवेशनावसरे 'पं. दीनदयाल उपाध्यायोऽखिलभारतीयो महामन्त्री' रूपेणोद्घुष्टः। 1967 ख्रीष्टाब्दं यावदस्मिन् पदे समारूढः सन् राष्ट्रम्प्रति समर्पितभावनया समुल्लेखनीयं योगदानं प्रायच्छत्। परमसमय एव 11 फरवरी, 1968 तमे दिनांके भारतीय-जनसंघस्याध्यक्षस्य पण्डित-दीनदयाल-उपाध्यायस्य 'मुगलसराय-रेलवे-स्टेशन' इत्यत्र 'यार्ड' क्षेत्रे मृतशरीरमवलोकितं जनैरद्यापि रहस्यमयमित्यस्माकं भारतीयानां दौर्भाग्यम्।

इतः पूर्वं 1967 ईशवीयाब्दे दिसम्बरमासे 'कालीकट' अधिवेशने पण्डितवर उपाध्यायो भारतीयजनसंघस्याध्यक्षरूपेण चितः। 'चरैवेति' 'चरैवेती'ति सन्देशस्तत्रानेन दत्तः। एतद्विषये डॉ. श्यामाप्रसादमुखर्जी-महोदयानां वाक्यात्मकशब्दा आसन्- 'दीनदयालद्वयं यद्यहम् लभेय, भारतीय-राजनीतेर्मानचित्रं परिवर्तयेयम्' इति।

**एकात्म-मानववादस्य प्रणेता**- 'एकात्म-मानववादः' भारतीय-जनसंघस्य राष्ट्राय जीवनदर्शनं मन्यते। अस्य प्रणेता च पण्डित-दीनदयालुरेवासीत्। तदनुसारं संस्कृतिनिष्ठा राजनीतिकजीवनदर्शनस्य प्रथमं सूत्रम्। भारतीयसंस्कृतिम्प्रति ममत्वशीलः प्रत्येकं भारतीयो मानवसमूहरूपेण एक एव। तदीया जीवनशैली, कला, साहित्यम्, दर्शनञ्च भारतीय-संस्कृतिरेव। अतो भारतीय-राष्ट्रवादस्याधारभित्तिस्तदीया संस्कृतिरेव। अस्यां संस्कृतौ पूर्णतो निष्ठा स्यात् तदैव एकात्म-भारतं स्थास्यति। 'वसुधैव कुटुम्बकम्' इति भारतीय-सभ्यताया मूलमन्त्रः। **हिन्दुत्वमयीं** भारतीयराजनीतिं स वाञ्छति स्म।

एकात्म-मानववादः सम्पूर्णसृष्ट्या सह मानवजीवनस्य सम्बन्धात्मकं दर्शनमस्ति। अस्य अवधारणाया केन्द्रे व्यष्टेः समष्टौ समावेशस्य भावना वर्तते। तथा हि- व्यक्तिः परिवारं, परिवारः समाजं, समाजः ज्ञातिम्, ज्ञातिः राष्ट्रम्, राष्ट्रमपि अखिल-

विश्वम्, ततोऽखिलं ब्रह्माण्डमेव समावेशयति। इत्थमस्याम् अखण्डमण्डलाकाराकृतौ सर्वेऽपि प्राणिनः परस्परं भावयन्तः परस्परं स्वाभाविक-सहयोगिनः सन्ति। न कोऽप्येषां मध्ये संघर्षः। अस्यैकात्म-मानव-वादस्य तुलना साम्यवाद-समाजवाद-पूंजीवादैः सह कर्तुं न पार्यते। वस्तुतोऽयं वाद एकात्म-मानव-जीवन-दर्शनमस्ति। 22- 25/04/1965 दिनांके मुम्बई-नगरे पण्डित-दीनदयाल उपाध्यायद्वारा प्रदत्तानां चतुर्णां व्याख्यानानां सञ्चयनमेतत् दर्शनम्।

**वैदुष्यम्-** पण्डित उपाध्यायो महान् चिन्तको दार्शनिकः संघटकश्चासीत्। तस्य कृतयः सन्ति-

1. भारतीय अर्थनीतिः विकास की एक दिशा, 2. राष्ट्रजीवन की दिशा , 3. सम्राट् चन्द्रगुप्त, 4. एकात्म-मानववाद (Integral Humanism), 5. जगद्गुरु-शंङ्कराचार्य, 6. दो योजनाएँ, 7. राष्ट्रचिन्तन, 8. एक प्रेमकथा, 9 भारतीय अर्थनीति का अवमूल्यन।

पत्रकारतयाऽयं पण्डितः सम्पूर्णं राष्ट्रमपि अजागरयत्। 'स्वदेश' (दैनिक), 'पाञ्चजन्य' (साप्ताहिक) तथा 'राष्ट्रधर्म' (मासिक) - पत्रिकाणां स सम्पादनमकरोत्। अतो भारतीयपत्र-कारतायाः स पुरोधाः मन्यते। सहैवानेन लखनऊ-नगर्यां 'राष्ट्रधर्मप्रकाशनलिमिटेड' इत्यस्य स संस्थापकोऽभूत्।

संक्षेपत स एकात्म-मानववादस्य प्रणेताऽऽसीत्। जनसंघस्य आर्थिकनीतीनां रचनाकार आसीत्। सामान्य-जनानां सुखमेवार्थिकविकास-स्योद्देश्यमिति तस्य धारणाऽऽसीत्। वस्तुतोऽयम् अन्वर्थनामा। तथाहि- उपेत्य अधीयते अस्माद् असौ **उपाध्यायः**। दीनो निःस्वः इति पर्यायवचनः। निर्गतं स्वम् अस्य असौ निःस्वः (दीनः)। दयाऽस्मिन् अस्तीति दयालुः। दीनानां दयालुः = दीनदयालुः। पण्डा=परिपक्वा मतिर्यस्यासौ पण्डितः। अतः 'पण्डित-दीनदयालु उपाध्यायः' इति सार्थकं नाम अवर्तत।

सम्प्रति यशस्वी प्रधानमन्त्री श्री नरेन्द्र मोदी-महोदयः उपाध्यायानामेव पदचिह्नानि अनुसर्तुं प्रयतते। तत्स्मृतौ- 'मुगलसराय' इति स्थाने 'दीनदयालउपाध्याय रेलवे स्टेशन' इति, 'कच्छ' जनपदे 'काण्डला-बन्दरगाह (Kandla Port) इत्यस्य स्थाने 'दीनदयाल-बन्दरगाह' इति नाम्ना परिवर्तनम् विहितमिति प्रशंसनीयम्। वस्तुतः स न केवलं जन्मना, अपितु कर्मणाऽपि महान् आसीत्। भारत-राष्ट्राय हुतात्मानं पण्डित-दीनदयाल-उपाध्यायम् महान्तं पुरुषं वन्दामहे।

**- सम्पादकः**

जोधपुरस्थ-जयनारायणव्यासविश्वविद्यालये संस्कृतविभागाध्यक्षचरः,

जयपुरस्थ-जगद्गुरु-रामानन्दाचार्य- राजस्थान-संस्कृत-विश्वविद्यालये व्याकरणपीठाध्यक्षचरश्च।

दूरभाषाङ्कः: 8386943655

# भारतीयसंस्कृतौ शिक्षकगुणाः

❑ डॉ. मुकेश जैनः

सम्प्रति आचार्यशब्दस्य गुरुशब्दस्य वा प्रयोगः अतीव- संकीर्णे अर्थे क्रियते, यस्यान्तर्गतं औपचारिकपदधारी विद्यालयात् विश्वविद्यालय-पर्यन्तं यः अध्यापनं करोति सः 'शिक्षकः' इत्युच्यते। यदि व्यापकदृष्ट्या विचार्यते तर्हि शिक्षायां पठनाध्यापनयोः उभयोः समावेशः भवति अर्थात् वयं प्रतिदिनं केनचित् प्रकारेण किमपि शिक्षेमः पाठयामः च। कदाचित् शिष्यस्य भूमिकायां कदाचित् आचार्यस्य भूमिकायां। एवं यथार्थतः कोऽपि सजीवः निर्जीवः वा अस्माकं कृते गुरुरूपेण कार्यं कर्तुं शक्नोति। एतत् निम्नलिखित-उदाहरणेन अवगन्तुं शक्यते -

**भागवतमहापुराणे** अवधूतोपाख्यानरूपेण भगवता श्रीकृष्णेन आत्मनःअन्तिमेषु दिनेषु उद्धवेन सह दत्तात्रेययद्वोः एतस्य वार्तालापस्य उल्लेखः कृतः अस्ति। तस्य विवरणं भागवतमहापुराणस्य एकादशस्कंधस्य सप्तमे अष्टमे च अध्याये प्राप्यते। यदा राज्ञा यदुना अवधूतः स्वगुरुविषये पृष्टः तदा तेन उक्तम् - 'राजन्! विवेकः सर्वसिद्धीनां प्राप्तये मूलकारणम्! अविज्ञाः जनाः ब्रह्मसदृशं गुरुं प्राप्य अपि किमपि लाभं प्राप्तुं न शक्नुवन्ति! अस्मिन् जगति अन्यः कोऽपि साहाय्यं कर्तुं न शक्नोति। मोक्षः केवलं स्वस्य प्रयत्नेन एव सम्भवति। पुराणानुसारं भगवान् दत्तात्रेयः ब्रह्मविष्णुमहेशानां संयुक्तावतारः अस्ति। तस्य उपदेशाः विभिन्नेषु पुराणेषु, दत्तात्रेयोपनिषदि, अवधूतोपनिषदि च संगृहीताः सन्ति।

दत्तात्रेयस्य चतुर्विंशति- गुरूणां शिक्षकस्य अवधारणायाः व्याख्याने महत्त्वपूर्णा भूमिकास्ति-

**पृथिवी वायुराकाशमापोऽग्निश्चन्द्रमा रविः।**
**कपोतोऽजगरः सिन्धुः पतङ्गो मधुकृद्गजः।।**
**मधुहा हरिणो मीनः पिङ्गला कुररोऽर्भकः।**
**कुमारी शरकृत् सर्प ऊर्णनाभिः सुपेशकृत्।।**
(भागवते 11.33-34)

एषु चतुर्विंशति- शिक्षकेषु पञ्च तत्त्वानि अस्मान् बहुधा सार्थकजीवनाय सन्देशं प्रयच्छन्ति -

**पृथिवी**- वयं पृथिव्याः सहिष्णुतायाः भावनां शिक्षितुं प्रभवामः।

**वायुः** - नित्यं क्रियाशीलता, संतप्तानाम् आश्वासनं, गन्धं धारयन् तत्र आत्मनः निर्लिप्तता, एतानि लक्षणानि वायुः उपदिशति।

**आकाशः** - अनन्तः विशालः च भूत्वापि अङ्के बहूनि ब्रह्माण्डानि धारयति, यः आकाशः ऐश्वर्यशाली सन् अपि अहंकारशून्यः, सोऽपि महान् गुरुः अस्ति।

**जलम्** - शुद्धता-सरलता -द्रवतायाः प्रतीकः तापं शीतलतायां परिणमयन्, प्राणप्रदः समुद्रस्य पुत्रः सन् अपि आत्मत्यागार्थं प्रत्येकं गृहं प्राप्नोति - ईदृशानाम् अनुकरणीय- वैशिष्ट्यानां धारणात् जलम् अपि उत्तमः आचार्यः अस्ति।

**अग्निः** - नित्यं प्रकाशमानः, उष्णः, नोदने अपि

ऊर्ध्वमुखी, अपरिग्रहगुणयुक्तः, यस्य कस्यचित् स्पर्शं करोति तस्य स्वरूपं परिवर्तयितुं समर्थः अग्निः नैकान् विषयान् उपदिशति।

इन्द्रियाणां क्षणिकाकर्षणेन जीवस्य कियती हानिः भवति इति प्रकृतेः अधोलिखित-तत्त्वेभ्यः ज्ञातुं शक्यते ।

**भृङ्गः कुररपक्षी च** - रागेण मोहितः भृङ्गः स्वजीवनस्य मृत्योः वा विषये अचिंतयन् कमलपुष्पे उपविष्टः रात्रौ जागरणेन प्राणान् नाशयति। एवमेव यदा अन्ये बलिष्ठाः पक्षिणः कुररपक्षिणः मांसखण्डं हरन्ति तदा मांसखण्डं परित्यज्य एव तेन शान्तिः अनुभूयते। इत्थं कुरर-पक्षिणा इव अस्माभिः अधिकानि वस्तूनि स्वसमीपे एव स्थापयितुं लोभचिन्तनं त्यक्तव्यम्।

भृङ्गेभ्यः अपि अवगन्तुं शक्यते यत् यत्र-यत्र किमपि सार्थकं वस्तु अस्ति तत्र-तत्र तत्क्षणमेव स्वीक्रियताम्, यथा भृङ्गाः भिन्न - भिन्न -पुष्पेभ्यः परागं गृह्णन्ति।

**गजः पतङ्गः च** - कामुकः गजः काष्ठनिर्मिताभिः हस्तिनीभिः पाशे आपतति, पतङ्गः अग्निं प्रति आकृष्टः भूत्वा स्वात्मनि दहति, तथैव अस्माभिः सौंदर्यस्य मिथ्याभ्रमे आकर्षणे च न संभ्रांतव्यम्, अन्यथा आजीवनं दुःखानां भोगः एव उपायः।

**मृगः मीनः कपोतः च** - कर्णविषये आसक्तस्य मृगस्य आखेटकैःग्रहणम्, जिह्वालोलुप -मत्स्यस्य धीवरेण जाले पाशनम्, कपोतस्य च जाले पतनं इति दृष्ट्वा ज्ञानं प्राप्यते यत् लोभ-आलस्य-अविवेकादयः परमापदां पदम्।

**पिङ्गला वेश्या** - इन्द्रियाणां दुर्बलतायाः स्वकीयं महत्त्वं नष्टम् अवबुध्य पश्चात्तापेन अन्येभ्यः सावधानतायाः सन्देशं ददती पिङ्गला भौतिकशरीरस्य क्षणिकतायाः सन्देशमपि दत्तवती।

**मधुहा**- यथा मधुहा मधुमक्षिकाभिः संगृहीतं रसं अपहरति, तथैव तेन सञ्चितधनम् अपि अन्येन पुरुषेण उपभोक्तुं शक्यते।।

**मकरकः**- मकरजालवत् ईश्वरः अपि मायया ब्रह्माण्डं सृजति, तस्मिन् भ्रमति, अन्ते च तत् सङ्गृह्णाति। प्रत्येकं जनः स्वभावनानुसारं विचारानुसारं च स्वस्य जगत् निर्माति। इत्थं यदि सःइच्छेत् तर्हि पुरातनं संगृह्य नूतनं वातावरणं निर्मातुम् अर्हति।

सूर्यचन्द्रादयः शाश्वताः अपि अश्रान्ताः सन्तः स्वकर्तव्येषु निरन्तरतया अस्मान् परिश्रमिणः भवितुं प्रेरयन्ति।

**चन्द्रः** - स्वप्रकाशाभावे अपि यः प्रकाशाय सूर्यं प्रार्थयित्वा पृथिव्यै चन्द्रिकां ददाति, परोपकारी कार्यं करोति, सर्वासु कलासु क्षीणासु अपि निराशः न उपविशति अपितु पुनः पुनः अग्रे गन्तुं साहसं सङ्गृह्णाति धैर्यवान् चन्द्रमाः।

**सूर्यः** - नियमितता -नैरन्तर्यम् -तीव्रता- कान्तिः च इति गुणैः सूर्यः अनुकरणीयः अस्ति।

**समुद्रः** - सः पयोधिः स्वसीम्नः परं न गच्छति, रत्नाकरोऽपि विनयशीलः, लवणयुक्तोऽपि अपि मधुरं जलं वृष्ट्यै दातुं आतुरः सिंधुरपि ज्ञानप्रदाता अस्ति।

**निर्दोषः बालकः** - आसक्ति- द्वेष -चिन्ता- काम-

लोभ- क्रोधादिभिः च विहीनः जीवः कियान् मृदुः, सौम्यः, सुन्दरः च प्रतीयते, कीदृशः सुखी शान्तिपूर्णः च तिष्ठति, इमान् गुणान् ज्ञापनाय बालः अपि समर्थः।

अभ्यासं, समर्पणं, लक्ष्यं प्रति एकाग्रता च कथं फलप्रदा सिद्ध्यति इति उदाहरणानि निम्नलिखित-रूपेण सन्ति -

**स्त्री (अविवाहिता बालिका)** - अनेकानि कङ्कणानि धारयन्ती भोजनस्य पाकस्य कारणेन कोलाहलात् बालिका एकं एव कंकणं धृत्वा विना कोलाहलं धान्यं कुट्टितवती येन अतिथयः काः अपि बाधाः न अनुभवेयुः। अनेक- कामानां कारणात् मनसि संघर्षाः उत्पद्यन्ते, परन्तु यदि एकमेव लक्ष्यं नियतं भवेत् तर्हि सर्वाः चिंताः शान्ताः भवन्ति, एतादृशी प्रेरणादात्री स्त्री अपि अज्ञानतिमिरं नाशयति।

**शरकृत्** - दत्तात्रेयः एकं बाणकारं दृष्टवान् यः बाणनिर्माणे एतावान् लीनः आसीत् यत् राज्ञः अश्वः तस्य समीपं गतः, परन्तु सः अविचलितः एव। अतः अभ्यासेन, त्यागेन च मनः नियन्त्रितव्यम्।

मनुष्याः भयङ्कराः बोध्यमानाः सरीसृपेभ्यः अपि जीवने शिक्षां ग्रहीतुं शक्नुवन्ति -

**सर्पः** - भगवान् दत्तात्रेयः सर्पात् ज्ञातवान् यत् कोऽपि तपस्वी एकाकी एव जीवनं जीवेत्। कदापि कस्मिन्नेव स्थाने न स्थित्वा देशं-देशं गत्वा ज्ञानं प्रसारणीयम्।

**अजगरः** - क्षुधार्तः अजगरः पङ्कं खादित्वा तृप्तः तिष्ठति, शिशिरर्तौ यदा तस्य अङ्गानि कठोरताम् आप्नुवन्ति, वृष्टिकारणात् तस्य मार्गः अवरुद्धः भवति तदा तानि कष्टानि धैर्यपूर्वकं सहमानं अजगरं दृष्ट्वा तस्मात् संतोषः सहिष्णुता च गुणौ शिक्षितुं शक्येते।

**भृङ्गकीटः** - भृङ्गकीटः एकं झींगुरं प्रगृह्य तं स्वस्य मंदगानस्य प्रभावेण स्वरूपे परिवर्तयति इति दृष्ट्वा एतत् प्रतीयते यत् एकाग्रतायाः तन्मयतायाः च माध्यमेन मनुष्यः शारीरिकरूपेण मानसिकरूपेण च आत्मनः कायाकल्पं कर्तुं सफलो भवितुम् अर्हति। एवं अचेतनानि अपि अस्माकं कृते महागुरुत्वेन कार्यं कुर्वन्ति।

सत्यं यत् भौतिकरूपेण गुरुः भौतिक-व्यक्तिः अस्ति, किंतु गुरु-शिष्यपरम्परा शरीरस्य सम्बन्धः नास्ति, आत्मनः सम्बन्धः एव। अनया एव भावनया संस्कृतसाहित्ये भक्तिकालीन-कविना स्वगुरोः अलौकिकवैभवं गीतम् -

**गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।**
**गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः॥**
(श्रीगुरुगीता श्लोक १४७)

**ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम् ।**
**मन्त्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा ॥**

'गु'कारः अन्धकारः, 'रु'कारः च कान्तिः; अन्धकारस्य निराकरणं कृत्वा ज्ञानप्रकाशप्रदानेन **गुरुः** इत्युच्यते।

**कुलार्णवतन्त्रस्य त्रयोदशे उल्लासे** देवीश्वरयोः - संवादे ईश्वरः देव्यै गुरुलक्षणं वर्णयति, कथयति च -

द्वेष- लज्जा -भय-शोक-गोत्र-जात्यादयः अष्टपाशाः इति उच्यंते । एतेभ्यःपाशेभ्यः मुक्तो भूत्वा मनुष्यः महेश्वरवत् भवति, अतः इमान् पाशान् यः वारयति सः **गुरुः** एव।

अत्र गुरोः षड्भेदाः वर्णिताः - प्रेरकः, सूचकः, वाचकः, दर्शकः, शिक्षकः बोधकः च। एतेषु पञ्च तु कार्यभूताः, षष्ठतमः 'बोधकस्तु' कारणरूपः। अत्रापि उच्यते यत् यथा मधुलुब्धः भृङ्गः एकस्मात् पुष्पात् अन्यतमं पुष्पं प्रति गच्छति, तथैव ज्ञानलुब्धः शिष्यः एकस्मात् गुरोः अन्यतमं प्रति गच्छेत्।

वस्तुतः अन्यत्र तु गुरोः केवलं प्रकारद्वयम् विचार्यते - दीक्षागुरुः शिक्षागुरुः च। आध्यात्मिकाभ्यासव्यापारे प्रथमः दीक्षागुरुः, ततः शिक्षागुरुः मन्येते।

सत्यनिष्ठः गुरुः शुभाशुभयोः, धर्माधर्मयोः, कर्माकर्मणोः भेदं व्याख्याति। तं विना कोऽपि अस्मान् भवसागरं पारयितुं न शक्नोति। प्राचीनेतिहासेष्वपि लिखितमस्ति यत् योग्यं गुरुं प्राप्य शिष्यः सर्वोच्चशिखरं प्राप्नोति। यथा भगवान् रामः वशिष्ठं विश्वामित्रं च, श्रीकृष्णः सांदीपनीं, कर्णः भगवंतं परशुरामं, अर्जुनः द्रोणं, भीमः, दुर्योधनः च बलरामं, चन्द्रगुप्तः चाणक्यं, शिवाजी महाराजः समर्थरामदासं, विवेकानन्दः रामकृष्णं, श्रीनिवास रामानुजन् हार्डीसदृशं गुरुं प्राप्य स्वभौतिकं शरीरं पुण्ययुक्तं कृतवन्तः। प्लेटो-सुकरात-अरस्त्वादीनामपि महती गुरु-शिष्य- शृङ्खलास्ति। भगवान् श्रीकृष्णः स्वगुरुपुत्रं यमराजात् पुनः आनयत्, गुरुं तस्य पुत्रं निवर्त्य तं प्रति गुरुदक्षिणायाः निर्वहणम् अकरोत्। शिवाजी स्वगुरोः आज्ञापालनार्थं सिंहिकायाः दुग्धम् आनयत्।

गुरुः मार्गदर्शकः अस्ति। सः बुद्धिमते शिष्याय मूर्खशिष्याय च समानरूपेण शिक्षां प्रयच्छति इति भवभूतिना **उत्तररामचरिते** उक्तम् -

**'वितरति गुरुःप्राज्ञे विद्यां यथैव तथा जडे ।'** (अंकः 2,श्लोकः 4)

यथा कुम्भकारः आर्द्रमृत्तिकां व्यवस्थितरूपं ददाति तथा गुरुः अपि स्वशिष्यजीवनं ज्ञानाकारं ददाति, परन्तु शिष्यस्य जीवनमपि आर्द्रमृत्तिकया इव येन केनापि रूपेण परिवर्तितुं सज्जः भवेत्। गुरुः शिष्यस्य समर्पणम् अवलोक्य तस्य जीवने ज्ञानदीपं प्रज्ज्वालयति। शिष्यस्य समर्पणं नचिकेता-एकलव्य-विवेकानन्द-आदीनां सदृशं भवेत्।

अद्यतने वैज्ञानिकयुगे गूगलः, बृहत् -पुस्तकालयाः, अन्तर्जालस्य विविधानि साधनानि अस्मभ्यं सूचनां प्रयच्छन्ति, तत् तु न ज्ञानं, ज्ञानं केवलं गुरुणा एव दीयते; शुकदेवमुनिना द्वादशवर्षपर्यन्तं गर्भे द्वादशवर्षपर्यन्तं गर्भात् बहिः च भक्तिः कृता तथापि गुरुं विना ज्ञानं प्राप्तुं न शशाक सः।

प्राचीनकाले एतादृशानि बहूनि उदाहरणानि सन्ति येन सिद्धं भवति यत् गुरुकुलाश्रमे राजपुत्रनिर्धनयोः च शिक्षाप्रदाने भेदः नासीत्। शिष्यस्य सामर्थ्यं दृष्ट्वा एव गुरुः तं चरणयोः स्थानं ददाति स्म। राज्ञे परीक्षिते श्रीमद्भागवतस्य अमृतकथां श्रावयितारं शुकदेवमुनिं राजर्षिः जनकः कठिनपरीक्षां कृत्वा योग्य-शिष्यरूपेण परीक्ष्य ज्ञानं दत्तवान्। **कठोपनिषदि** विस्तरेण उक्तं यत् यमः नचिकेतसः सम्यक् परीक्षणं कृत्वा एव उपदेशं दत्तवान्। यदा शुक्रः कचस्य विनयेन स्वभावेन च सम्पूर्णतया सन्तुष्टः अभवत् तदा सः तं शिष्यत्वेन स्वीकृतवान्। प्राचीनकाले ज्ञानी महापुरुषः अपि शिक्षाप्राप्तेः पूर्वं अहङ्कारस्य त्यागं करोति स्म, तदा एव सः शिक्षां प्राप्तुं प्रभवति स्म।

**श्वेतकेतुना** पाञ्चालराज्यस्य शासकः प्रवाहणजबालीइत्यस्य गृहात् विना उपदेशं गृहीत्वा प्रत्यागतस्तस्य पिता आरुणिः स्वयं पाञ्चालराज्ञः गृहं गत्वा पञ्चाग्नेः ज्ञानं ज्ञातुं निश्चितवान्। प्रसिद्धदार्शनिकः ब्रह्मविद्या निष्णातः च ब्राह्मणः गार्ग्यबालाकी ब्रह्मविद्यायाः शिक्षां काशीराज-अजातशत्रोः गृहीतवान्।

अस्माकं शास्त्रेषु पुराणेषु च एतादृशानि बहूनि उदाहरणानि सन्ति यदा कश्चन योग्यः गर्भस्थः बालः मातुः गर्भे योग्यगुरोः शिक्षां प्राप्तवान्। अभिमन्युः मातुः सुभद्रायाः गर्भे अर्जुनात् चक्रव्यूहज्ञानं प्राप्तवान् आसीत् इति प्रसिद्धम्। कहोडपुत्रः **अष्टावक्रोऽपि** मातुः सुजातायाः गर्भे बोधं प्राप्तवान्।

गुरुः सदा सम्मानम् अर्हति। महापुरुषाणां तिरस्कारात् नहुषेण देवराज्ञ इन्द्रस्य पदं त्यक्तम्। अद्य समाजे हिंसा- स्तेय- व्यभिचार- मद्यपान- भ्रष्टाचार- मिथ्यावाणी- नित्य साम्प्रदायिककलहादयः मातृपितृणां शिक्षकाणां च तिरस्कारस्य परिणामाः सन्ति। तैत्तिरीयोपनिषदि गुरुः शिष्यं सद्वृत्तिम् अनुसर्तुं प्रेरयति -

**'सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः।'**

**मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।**

(तैत्तिरीय उपनिषद्, शिक्षावल्ली, अनुवाक 11, मंत्र 1)

श्रीकृष्णेन गीतायां उक्तम् - **तत्त्वज्ञानं गुरुभक्तिप्रसादेन एव प्राप्यते**। शिष्येण समिधां हस्ते कृत्वा श्रोत्रियब्रह्मनिष्ठगुरुसमीपं गन्तव्यमिति नियमः आसीत्। प्राचीनभारतस्य आचार्याः कियंतः उदाराः बृहद्हृदयाश्च आसन्, इति **आलारकलामस्य** अस्मात् कथनात् अनुमातुं शक्यते, तेन स्नातकबोधिसत्त्वाय उक्तम् आसीत् - 'भन्ते! भवत्सदृशम् आदरणीयं मित्रवत् यतिं प्राप्य वयं अतिप्रसन्नाः स्म। मत्सदृशं ज्ञानं तवापि अस्ति। यथा अहं तथा त्वं। यथा त्वं तथा अहम्। भन्ते, कृपया एतस्य गुरुकुलस्य चालने मम साहाय्यं कुरु'इति।

पुराकाले तादृशाः अपि आचार्याः आसन्, येषां जीवनं अटनशीलं, यायावरीयं च आसीत्। सः परिभ्रमन् स्वयमेव शिष्याणां चयनं कृत्वा तेभ्यः शिक्षां प्रयच्छति स्म। एतादृशाः आचार्याः **'चरक'** इत्युच्यन्ते।

गुरुः स्वज्ञानं न गोपयति स्म, अपितु तत् न्यासं मन्यते स्म। शिक्षकस्य छात्रं प्रति महती स्नेहभावना आसीत् तथैव छात्रस्य आचार्यं प्रति महती आदरभावना आसीत्। अरुणस्य पौत्रः उद्दालकस्य पुत्रः श्वेतकेतुः महान् आचार्यः आसीत्। कादम्बर्यां ज्ञायते यत् गुरोः शुकनासस्य चन्द्रापीडाय उपदेशः, हर्षचरिते सम्राजे हर्षाय सिंहनादस्य उपदेशाः वर्तमानयुवसंततीनां कृते मानवीयमूल्यानां महान्तं सन्देशं दातुं समर्थाः सन्ति।

प्राचीनशिक्षाव्यवस्थायां न केवलं कण्ठस्थीकरणं अपितु शब्दैः सह अर्थज्ञाने अपि पूर्णं बलं दत्तम्, यस्य प्रमाणं यास्कस्य मन्त्रः अस्ति, यस्यार्थः - वेदमन्त्राणां अर्थं अजानन् जनः 'स्थाणु' अर्थात् 'भारवाहकः' कथितः।

विदेशीयाः विद्वांसः अपि भारतीयज्ञानस्य महत्त्वे

प्रामाणिकतायां च पूर्णविश्वासं, आस्थां च अधारयन्। भारतीयगुरूणां विषये **इत्सिङ्गेन** लिखितं यत् तेषां मुखपद्मतः यत् ज्ञानं प्राप्तवान् तत् मम कृते अन्यत्र दुर्लभम् आसीत् इति अहं स्वात्मानं धन्यं मन्ये। प्राचीनभारतीयग्रन्थानुसारं महर्षिवेदव्यासः **प्रथमगुरुः** इति स्थितिः अस्ति, अतः एव **गुरुपूर्णिमा** वेदव्यासं प्रति समर्पिता अस्ति। महर्षेः शिष्याः ऋषि जैमिनि -वैशम्पायन- -मुनिसुमन्तु- रोमहर्षण- इत्यादयः आसन्। आदिगुरुः शंकराचार्यः **हिन्दूनां धर्मगुरुः** इति मन्यते। बृहस्पतिः देवानां महागुरुः शुक्राचार्यः दैत्यगुरुः। तस्मिन् समये मनु- कश्यप- वशिष्ठ- विश्वामित्र-अगस्त्य- बृहस्पति- शुक्र- भरद्वाज- अत्रि- कण्व-भृगु -च्यवन -शौनक सदृशाः उच्चवर्गीयाः शिक्षकाः वसुधां अलंकुर्वन्ति स्म। एतेषु गुरुकुलेषु शिक्षकाः छात्राः च दार्शनिकचिन्तनं पराकाष्ठां प्रति नीतवन्तः।

तेषु कालेषु महिलाशिक्षायाः उत्तुंग-स्थितेः अनेकानि उदाहरणानि अपि वयं प्राप्नुमः। याज्ञवल्क्य-गार्गी-संवादः इतिहासे प्रसिद्धः। वाचक्नवी गार्गी -मैत्रेयी- लोपामुद्रा- अपालादयः स्त्रीशिक्षिकाः स्त्रीशिक्षायाः अनुकरणीयं रूपं प्रस्तुतवत्यः। तस्मिन् समये **नालन्दादयः** ज्ञानसमृद्धाः विश्वविद्यालयाः आविर्भूताः येषु संगठितशिक्षाव्यवस्थाः दृश्यन्ते। आर्यदेव -शान्तरक्षित स्थिरमति -शिलाभद्र- ह्वेनत्सांग- इत्सिंग- कमलशील- बुद्ध- ज्ञानपाद- पद्मसंभव- वीरदेव इत्यादयः अन्ताराष्ट्रियाः (प्रसिद्धाः) छात्राः शिक्षकाः च अस्मात् विश्वविद्यालयात् सम्बद्धाः आसन्। **विक्रमशिला** अपि एतादृशः एकः विश्वविद्यालयः आसीत् यस्मिन् रत्नाकरशांति- दीपंकर -श्रीज्ञान-अभयकरगुप्त - वैरोचन रक्षित, तथागत रक्षितसदृशाः विद्वांसः शिक्षयन्ति स्म। विश्वविद्यालये प्रवेशसमये द्वारपण्डितः प्रवेशपरीक्षां स्वीकरोति स्म, परीक्षायाम् उत्तीर्णा भवन्ति चेदेव छात्राः प्रवेशयोग्याः भवन्ति स्म। ईश्वरस्य वर्णनं योगसूत्रे अपि गुरुरूपेण कृतम् अस्ति- **पूर्वेषामपि गुरुः कालेनानवच्छेदात्। (योगसूत्रं-1/26)**

अस्माकं प्राचीनैः ऋषिभिः महर्षिभिः, ब्रह्मर्षिभिः, कविभिः, दार्शनिकैः, विचारकैः च शिक्षायाः परिभाषा कृता। उक्तं च यत् वास्तविकशिक्षा सा एव यस्य माध्यमेन युवानः शारीरिकरूपेण, मानसिकरूपेण, बौद्धिकरूपेण, सामाजिकरूपेण, आध्यात्मिकरूपेण, धार्मिकरूपेण नैतिकरूपेण च विकासं कुर्वन्ति। वस्तुतः एतादृशीषु एव परिस्थितीषु सर्वाङ्गविकासस्य प्रक्रिया पूर्णा भवति। वर्तमाने तु छात्रशिक्षकयोः सम्बन्धः अपि उपभोक्तासेवा-प्रदात्रोः अभवत्। सम्प्रति एकस्याः आदर्शशिक्षा-व्यवस्थायाः आवश्यकता वर्तते यस्मिन् न केवलं ज्ञानप्राप्त्यर्थं अपितु ज्ञानस्य व्यावहारिकप्रयोगे अपि बलं दत्तं भवेत् तथा च प्राचीनशिक्षाव्यवस्थायाः प्रासंगिकगुणानां समावेशं कृत्वा आदर्शगुरुशिष्य-सम्बन्धस्य पुनरुत्थानाय प्रयत्नाः करणीयाः।

- सहायक-आचार्यः,<br>
संस्कृतविभागः, राजकीय-महाविद्यालयः,<br>
बाड़मेरम् (राजस्थानम्)<br>
दूरभाषाङ्कः ८००३९५९७४१

क्रमशः

# स्वतन्त्रतायास्तात्पर्यम्

❑ डॉ. महेशचन्द्रशर्मा गौतमः
(साहित्याकादेम्या पुरस्कृतः)

मोहनदासकर्मचन्दगांधिमहाभागो दक्षिणाफ्रीकादेशे सत्यस्याहिंसाया असहयोगस्य च मार्गेणाङ्ग्लानां विरुद्धं विंशतिर्वर्षैः सिद्धार्थस्यान्दोलनस्य नेतृत्वं कृत्वा १९१५ तमे संवत्सरे जनवरीमासस्य नवम्यां तिथौ भारतं प्रत्यावर्तिष्ट। भारतवासिनो गांधिमहाभागं हृदयेनाभ्यनन्दिषुः। गांधिमहोदयोऽहमदाबाद-नगरे साबरमतीनद्यास्तटे आत्मन आश्रमं निर्मापयाञ्चकार। स देशभ्रमणं कृत्वा प्रथमं देशवासिनामवस्थामध्येतुमैषीत्। स एकवर्षं यावद् देशे ग्रामं ग्रामं नगरं नगरं परिभ्रम्य सर्वां स्थितिमध्यैष्ट। सोऽज्ञास्त यद् बिहारराज्ये चम्पारणे नीलस्य व्यवसायिन आङ्ग्लाः श्रमिकैः कृषकैः सह निरतिशयमत्याचारपूर्णं व्यवाहार्षुः। १८६० संवत्सरे बङ्गालराज्ये नीलस्य व्यवसायिनां श्रमिककृषकेष्वत्याचाराणां ग्रन्थिलां स्थितिमिवावर्तिषत चम्पारणस्य श्रमिककृषकाणां वैषम्याणि। १९१७तमे संवत्सरे वैषम्यमिदमधिकृत्य सूचितः साहाय्यार्थं प्रार्थितश्च गांधिमहाभागस्तस्य क्षेत्रस्य निवासिनां स्थितिं स्वयं तत्र गत्वा समीक्षितुं चम्पारणाय प्रास्थित। गच्छन् गांधिमहोदयो यावन्मोतीहारीत्यभिधेयं ग्राममभ्ययासीत् तावद् विशालसंख्यायां ये जनास्तमन्वयासिषुस्तेषु स्थानीयैर्ग्रामवासिभिः सहैव नैके नेतारोऽपि तस्य जनयात्रायां समायुक्ता अवर्तिषत। गांधिमहोदयस्य प्रभावेण भयाक्रान्तमाङ्ग्लशासनं समुद्देशनं दत्वा गांधिमहाभागं तत् क्षेत्रं परित्यज्य गन्तुमादिक्षत्। समुद्देशनं प्राप्यापि निर्देशमवधीरयन् महात्मा यदा निरन्तरं प्रागमत् तदा नगररक्षिणस्तमासिध्य न्यायाधीशस्य समक्षमुपातिष्ठिपन्।

**टिप्पणी :** समायुक्ताः - शामिल (ब.व.), समुद्देशनम् - नोटिस, लिखित आदेश, आसिध्य - गिरफ़्तार करके।

न्यायाधीशस्य समक्षमुपस्थापितो महात्मा गांधिमहाभागो व्यजिज्ञपत्, ''अयमस्ति मम देशः। स्वतन्त्रोऽस्म्यहमात्मनो देशे यथाकामं सर्वत्र भ्रमणाय। नाहं विदेशिनो भवत आदेशमनुयास्यामि। यदि भवान् कामयते कारागारे आसेधतु माम्।'' गांधिमहाभागस्यैतदुत्तरं न्यायाधीशं विस्मापिपत् सर्वेषां देशवासिनाञ्चावधानमनायासमेवाकृक्षत्। एषा समुत्पत्तिर्लोकमान्यबालगङ्गाधरतिलकमहोदयम् ऐनी बेसैण्टमहोदयाञ्चात्यन्तं प्राबीभवत्। विशालसंख्यायां देशभक्ता भारतीया अकस्मादेव तस्यानुयायिनोऽभूवन्। गांधिमहोदयेन न्यायालयस्यान्यायपूर्णस्यादेशस्यावधीरणाऽऽङ्ग्लाधिकारिणो विस्मेरान् व्यधात्। एष विषयो

भूयोऽपि महत्त्वपूर्णो भूयोऽपि प्रख्यातश्च न जायेतेति विचिन्त्य तेऽभिशंसनस्यापनयनमेवौपयिकममंसत। शासनं गांधिमहाभागं कृषकाणां वैषम्याण्यधिकृत्यानुसन्धानार्थमन्वज्ञासीत्। दीर्घसंघर्षानन्तरं महात्मगांधिमहाभागश्चम्पारणस्य कृषकेभ्यस्तेषामधिकारान् दापयित्वैव ततः प्रतिन्यवर्तिष्ट।

अहमदाबादस्य शिल्पशालाया स्वामिनां श्रमिकाणाञ्च मध्ये प्रवर्तमाने दीर्घे गम्भीरे च संघर्षे मध्यस्थो भूत्वा गांधिमहाभागः श्रमिकेभ्योऽपेक्षितं न्याय्यमधिकारमदीदपत्।

चम्पारणस्य कृषकाणामहमदाबादस्य शिल्पशालाश्रमिकाणाञ्च वैषम्याणां समाधानानन्तरं गांधिमहाभागो गुजरातराज्ये खेडाक्षेत्रस्य कृषकाणां परित्राणाय तत्राभ्ययासीत्। तस्मिन् वर्षे ऋतुविपर्ययात् कृषीवलानां कृषिफलं व्यनशत्। कृषिफलस्य क्षये राजस्वमुक्तिरवर्तिष्ट कृषकाणां विधिसम्मतोऽधिकारः परं कृषकाणां दयनीयामवस्थां प्रति संवेदनाशून्यं निष्करुणं शासनं सप्रसभं राजस्वसमाहरणाय सनिर्बन्धमवर्तिष्ट। कृषकाणां सर्वाणि प्रार्थनान्यल्पार्थान्यसिधन्। विट्ठलभाई पटेलो गांधिमहोदयश्चानुसन्धानानन्तरं कृषिफलस्य क्षये राजस्वमुक्तिं विधिसम्मताममंसाताम्। गांधिमहोदयस्य प्रार्थनमपि यदासिद्धार्थमजनि तदा स सर्वान् कृषकान् राजस्वार्पणान्न्यरौत्सीत्। आङ्ग्लानामत्याचारपूर्णमयुक्तियुक्तञ्चैतदाचरणं निरतिशयं निन्दनीयमवर्तिष्ट। अस्मिन् विषये तेषामत्याचाराणां पूर्णशक्त्या पर्यवस्थानमवर्तिष्टापरिहार्यतयापेक्षितम्। बल्लभभाईपटेलमहाभागोऽवित्तैकः पृथुप्रथो विधिवक्ता। गांधिमहोदयस्यानितरसाधारणं साहसिकमाचरणं पटेलमहाभागं सातिशयं प्राबीभवत्। आङ्ग्लाधिकारिणोऽकृतापराधानां कृषकाणां पशूनपाहार्षुः, तेषां गृहस्थस्य च वस्तून्यप्यपहृत्यानैषुः। अत्यधिकं श्रमेणोत्पादितस्य कृषीवलानां कृषिफलस्य शासनेन बलादपहरणमवर्तिष्ट सातिशयं पीडाकरो निर्धनेभ्यस्तेभ्यः। गांधिमहोदयः कृषकान् सनिर्बन्धं निरदिक्षद् यदाङ्ग्लानां निरतिशयमत्याचारं पर्यवतिष्ठमानैरपि न तैः कदापि राजस्वमर्पयितव्यम्। कृषकाणामेतदसहयोगात्मकमान्दोलनमाङ्ग्लशासकान् तेषां न्यायोचितमभ्यर्थनमुरीकर्तुं प्राववर्तत्। चम्पारणेऽहमदाबादे खेडाक्षेत्रे च गांधिमहाभागस्यासहयोगस्य सिद्धार्थतया गांधि-महोदयस्यान्दोलनस्यासहयोगरूपः प्रकारः सम्पूर्णे भारते व्यापकोऽभूत्।

क्रान्तिकारिदेशभक्तवीराणां मातृभुवः स्वातन्त्र्यार्थं क्रियमाणानि विचेष्टितानि नियन्त्रयितुं राजप्रतिनिधिश्चैम्सफोर्ड एकां समितिं स्थापयाञ्चकार। १९१७ संवत्सरे दिसम्बरमासस्य दशम्यां तिथौ स्थापिताया अस्याः समित्या अध्यक्षोऽवर्तिष्ट सम्राज उच्चान्यायालयस्य न्यायाधीशो रौलैटः। क्रान्तिकारिणां गतिविधीनां

दमनार्थं सनिष्पत्तिकानामुपायानामुपन्यासो ववृतेऽस्याः समित्या अभियोज्यता। तस्याः समित्या 'रौलैट एक्ट' इति प्रख्यातं विज्ञापनपत्रं यदुपन्यास्थत् तदनुसारं शासनं यं कमपि नागरिकं यदापि कामयेत कारणस्य निर्देशं विनैवासेधितुमक्षमिष्ट। न तत्रावर्तिष्ट पुनर्विचारप्रार्थनायै वितर्काय वा किमपि विधानम्। भारतीया इमं नियमं प्राबल्येन पर्यवास्थिषत। महात्मा गांधिमहाभागो राजप्रतिनिधिं चैम्सफोर्डं पत्रं लिखित्वानुपयुक्तमिदं विधानमपनेतुं न्यवीविदत। यदा गांधिमहोदयश्चैम्सफोर्डान्न किमप्युत्तरमवाप तदा स सत्याग्रहमुपक्रमितुं शपथपत्रमुपाचीक्लृपत्। स एकदिवसाय हरतालस्याह्वानं चकार। प्रथमं हरतालस्याह्वानं मार्चमासस्य त्रिंशत्तम्यै तिथयेऽवर्तिष्ट परमनन्तरं कैश्चित्कारणैस्तदर्थमप्रैलमासस्य षष्ठी तिथिर्व्यवसिताभूत्।

**टिप्पणी :** विज्ञापनपत्रम् – रिपोर्ट, पुनर्विचारप्रार्थना – अपील, वितर्कः – दलील।

रौलैटसमितिर्विशेषं विधानमुपन्यास्थद् यस्मिन् दण्डस्य व्यवस्थया सहैव प्रतिबाधकानां नियमानामपि समावेशोऽवर्तिष्ट। रौलैटविधानं भारतवासिन एतावदधिकमचुक्षुभद् यद् राजधानीदिल्लीमहानगरे हरतालं त्रिंशत्यामेव तिथौ क्रियान्वितमभूत्। शासनेन निर्दिष्टैर्नगररक्षिभिः प्रहृता गोलिका नैकान् विमलचेतसो नागरिकान् स्वातन्त्र्ययज्ञस्याहुतीर्व्यधुर्नैके चान्ये व्यापन्ना अजनिषत। चिकित्सालये कार्यरता आङ्ग्लाः परिचारिका व्यापन्नान् भारतीयनागरिकान् देशद्रोहिणः ख्यापयित्वा तेषामुपचारं प्रत्याचख्युः। गांधिमहाभागाद् भीतमाङ्ग्लशासनं महात्मनः पञ्जाबराज्ये प्रवेशं न्यरौत्सीत्। महात्मनो गांधिमहाभागस्य रेलयानं दिल्लीमभियायात् ततः पूर्वस्मिन् रेलयानास्थान एव नगररक्षिणो गांधिमहोदयमासेधिषुस्ततश्च बम्बईमहानगरं नीत्वा तं मुक्तमकार्षुः। महात्मनो गांधिमहाभागस्यासेध आबालवृद्धान् भारतीयान् विक्षिप्तबुद्धीन् व्यधात्। क्रोधोन्मत्ता युवानोऽहमदाबादनगरे द्वावधिकारिणौ त्यक्तजीवितौ व्यधुः। अष्टाविंशतिसंख्यका आन्दोलनकारिणोऽस्मिन् यज्ञ आत्मनो जीवनान्यहौषुः। त्रयोविंशत्यधिकमेकशतं जना गम्भीरं परिक्षता अजनिषत। अहिंसावर्तिष्ट महात्मनो गांधिमहोदयस्य सत्याग्रहान्दोलनस्याद्यः सिद्धान्तः। महात्माचिचिन्तद् यत् सर्वथा समानबलयोर्मध्य एव शस्त्रैः संघर्षः सम्भवति। शक्तिसम्पन्नैः शासकैः सह सामर्थ्यहीनानां प्रजानां संघर्षस्त्वहिंसास्त्रेणैवोपयुक्तः सम्भवति। अतोऽहिंसैव विद्यते सत्याग्रहस्याधारः। महात्मा सत्याग्रहस्याह्वानमात्मनो भयङ्करं मतिभ्रमं कथयित्वा तदाह्वानमपानैषीत्। अनुशोचन् महात्मा दिनत्रयं यावदनशनव्रतमाचारीत्।

**टिप्पणी :** व्यापन्नाः – घायल (ब.व.).

– पटियाला, 9781124775

# भारतम् अर्थात्

❑ डॉ. प्रीतिः पुजारा

पूर्वं मया चिन्तितं यत्

**भारतम्** अर्थात्
सर्पाकारा दीर्घाः शैलसेतवः
श्रेष्ठतमानि वसतिगृहाणि
नैकविधसेवासौकर्यपूरिताश्चिकित्सालयाः
प्रकामं चकासितानि मनोहराणि विमानपत्तनानि

**भारतम्** अर्थात्
भव्यातिभव्यस्ताजमहालयः
एकताप्रतीकरूपा सरदारस्य जाज्वल्यमाना
शालभञ्जी (statue of unity)
ऐश्वर्यसंपन्ना देवालयाः

**भारतम्** अर्थात्
विकासस्य ऊर्ध्वगाम्यालेखः
देशस्य वर्धमानमार्थिकं विकासमानकम् (GDP)
विश्वस्याग्रिमाणां धनिकानां सूच्यां समर्थितः क्रमः
अनारतं प्रणदितं हिन्दीचलचित्रं जगत्
सुस्मिता सेन..
ऐश्वर्याराय..
कियारा ...
दीपिका ...
अहा ! तदा गर्वेण उन्नतं मस्तकं जायमानमासीत्
किन्तु यदा मया ग्रीष्मकाले तिग्मसूर्यकिरणैः
प्रतप्ताः,
स्वस्य गेहसामग्रीसम्भारान् -
एकां त्रपुमञ्जूषायां वा क्षुद्रके वस्त्रस्यूते संचयित्वा
असमासिकदीर्घपङ्क्त्यां तूष्णीम्भावेन गम्यमानाः
श्रमिका दृष्टाः,
यदा पुनस्तेषां विषण्णानि ,श्यामलितानि
प्रस्वेदस्यन्दमानानि
असह्यक्षुधया तमोभूतैः नेत्रयुग्मैः
नमितान्याननानि च मया दृष्टानि,
तथा च
पितुस्स्कन्धमारुह्यमाणाः
स्वस्य भविष्यं सुचारुतया दृश्यमाना
निस्तेजा माणवका दृष्टाः,
यदा वा पुनः बुभुक्षाग्लानियुक्ताः
कङ्कालसारमण्डिताः
केवलं श्रद्धाबलेन प्रवातचपलदीपकुण्डकं रक्षितुं
विफलयत्नं कुर्वन्त्यस्तेषां स्त्रियो दृष्टाः
तदा मयाऽनुभूतं
अहा !

**भारतम्** अर्थात्
महासागरः
गभीरः ...अनिर्बद्धः....निरवधिः
तथा च लवणयुक्तः!!
हहा ! केवलं लवणयुक्तः!

(कोरोनाकाले ग्रामं प्रति गम्यमानानां श्रमिकाणां दुर्दशां दृष्ट्वा उद्भावितं काव्यम् )

---

**गुजरातीमूलम्** - रेणुका दवे
संस्कृतानुवादः – प्रीतिः पुजारा

# रचनाभ्युदयमहाकाव्ये कथावस्तुविवेचनम्

❑ नाथूरामसैनी

साधारणतया काव्ये षट् तत्त्वानि भवन्ति – कथानकम्, पात्रम्, संवादः, देशकालः, भाषाशैली प्रयोजनम् (उद्देश्यम्) च। एतेषु षट्सु प्रत्येकं स्वीयं महत्त्वं बिभर्ति तथापि कथानकस्य विशिष्टं महत्त्वं भवति। कथानकं विना तु काव्यस्य सृष्टिः न सम्भवेत्। वस्तुतः काव्यकथावस्तुनोः मध्ये कार्यकरणभावसम्भवः स्वीक्रियते। कथानके गतिशीलता मौलिकता च स्याताम्। गतिशीलता पात्रानुकारिणी भवति। कुशलकाव्यकारः पात्राणि विविधपरिस्थितिषु चित्रयित्वा तेषां विशेषताः प्रकटयति। कथानके प्रवाहता परमावश्यकी भवति।

संस्कृतलक्षणग्रन्थेषु प्राचीनकालादारभ्य आधुनिकैराचार्यैः कथावस्तुनो विषये सुविचारितं स्पष्टतयोक्तम् च। काव्यशास्त्रीयग्रन्थेषु कदाचित् प्राचीनतमे ग्रन्थे अग्निपुराणे लक्षितम् अस्ति कथावस्तु एवम् –

**सिद्धमुत्प्रेक्षितं चेति तस्य भेदावुभौ स्मृतौ।**
**सिद्धभागमदृष्टं च सृष्टमुत्प्रेक्षितं कवेः।।**[१]

तदनुसारं वस्तु द्विधा – सिद्धम् सृष्टम् च। सिद्धं कथानकम् आगमदृष्टम् अर्थात् इतिहासप्रसिद्धं भवति किन्तु सृष्टं कविकल्पितं भवति। एवमेव काव्यशास्त्रस्याद्याचार्यैः भरतमुनिभिः निगदितम् –

**इतिवृत्तं द्विधा चैव बुधस्तु परिकल्पयेत्।**
**आधिकारिकमेकं तु प्रासङ्गिकमथापरम्।।**
**यत् कार्यं हि फलप्राप्त्यै समर्थं परिकल्प्यते।**
**तदाधिकारिकं ज्ञेयमन्यत् प्रासङ्गिकं विदुः।।**

भरतमुनिमते कथानकम् आधिकारिक-प्रसङ्गिकभेदात् द्विविधं भवति। फलप्राप्तौ समर्थं कथानकम् आधिकारिकं प्रोच्यते। तस्योपकारकम् इतिवृत्तं प्रासङ्गिकम् उच्यते। तदपि प्रकरी तथा पताकाभेदाद् द्विविधम्। आचार्यधनञ्जयः प्रतिपादयति –

**तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः।**
**अधिकारः फलस्वाम्यमधिकारी च तत्प्रभुः।।**
**तन्निर्वृत्तमभिव्यापि वृत्तं स्यादाधिकारिकम्।**
**प्रासङ्गिकं परार्थस्य स्वार्थो यस्य प्रसङ्गतः।।**
**सानुबन्धं पताकाख्यं प्रकरी च प्रदेशभाक्।**
**प्रख्यातोत्पाद्यमिश्रत्वभेदात् त्रेधापि तत् त्रिधा।**
**प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितम्।**
**मिश्रं च संकरात् ताभ्यां दिव्यमर्त्यादिभेदतः।।**[२]

अर्थात् आधिकारिकप्रासङ्गिकभेदात् द्विधा, प्रासङ्गिककथानकं प्रकरी पताकाभेदेन द्विविधिम्। प्रासंगिकम् आधिकारिकं च प्रख्यात-उत्पाद्य-मिश्रितभेदेन प्रत्येकं त्रिविधिम्। एतेषां नव – भेदानां दिव्यमर्त्यदिव्यादिव्यभेदैः पुनः त्रिप्रकाराः भवन्ति। एवञ्च आचार्यधनञ्जयमते कथानकस्य सप्तविंशति-भेदाः सम्भवन्ति। आचार्यविश्वनाथस्तु –

**इदं पुनर्वस्तु बुधैर्द्विविधं परिकल्प्यते।**
**आधिकारिकमेकं स्यात् प्रासङ्गिकमथापरम्।।**[3]

साहित्यसारस्य रचयिता श्रीसर्वेश्वराचार्य: कथावस्तुनो द्वादश - भेदान् मन्यते। तदनुसारं मुख्यामुख्यौ द्वौ भेदौ, ततोऽमुख्यस्य पताकाप्रकरी पताकास्थानकेति त्रिभेदा:, तदनन्तरं च चतुर्णां भेदानां पुन: ऐतिहासिककाल्पनिकमिश्रिता: इति- त्रयो भेदा: भवन्ति।

आधुनिकसमीक्षका: कथानकस्य समीक्षणं विभाजनं नवीनरीत्या कुर्वन्ति। गद्यकाव्यसमीक्षका: डॉ. हरिनारायणदीक्षिता: प्रतिपाद्यविषयाधारे कथानकं विभजन्ते। तन्मते सर्वप्रथमं कथानकं सप्तधा - काव्यकलाप्रधानम्, सामाजिकम्, राजनीतिकम्, ऐतिहासिकम्, पौराणिकम्, विस्मयकारकम्, मनोवैज्ञानिकञ्च। तदनन्तरं देशकालकल्पनाप्रति-पाद्यविषयाधारेण चतुरशीतिभेदेषु कथानकं विभाजितम्। डॉ. हरिनारायणदीक्षिता: कथयन्ति –

'कथानक एक ऐसी रोचक विशालकाय कहानी का शास्त्रीय नाम है जिसमें परस्पर सुनियोजित, सुगुम्फित एवं कार्यकारणभाव से सम्बन्धित जीवन्त घटनाओं के तीव्र भंवर जाल में फँसे हुए आदर्श नायक-नायिकाओं की घात-प्रतिघातों से परिपूर्ण विषम परिस्थितियों के सुखान्त समाधान की आशा-वल्लरी सहृदय पाठकों की मनोभूमि में अन्त तक पनपती रहती है।'[४]

लब्धप्रतिष्ठ: पाश्चात्यविद्वान् फार्स्टरमहोदयो लिखति- 'The plot, There, is the novel in its logical intellectual aspects. It requires mystery, but the mysteries are solved later an, The reader may be moving about in worlds unrealized but the novelist has no misgiving.'[५]

कथानकविषये म्योरमहाभागस्तु एवं प्रतिपादयति – 'The term plot stands putside – These danger. It's a definite term, it is a literary term and it is universally applicable. It can be used in the widest popular sense. It designates for everyone not merely for the critics the chain of the events in a story and the principal which knits it together.'[६]

अनेन प्रकारेण प्राचीनै: अर्वाचीनैश्चाधुनिकै: काव्यशास्त्रविशेषज्ञै: कथानकं सम्यक्तया लक्षितं विवेचितम् च। कथानकं मुख्यं घटकं भवति, तत् सुसंघटितं व्यवस्थितं भवेत् तत्र शैथिल्यं न स्यात्। वर्ण्यविषयस्य आधारेण महाकाव्यस्य काव्यस्य वा कथानकं पौराणिकम् ऐतिहासिकं लोककथापरकम् काल्पनिकं च भवितुं शक्यते। सम्प्रति '**रचनाभ्युदयमहाकाव्यम्**'इति प्रकृतमहाकाव्यस्य कथानकं समीक्ष्यते[७] –

यथोक्तमस्माभि: तदनुसारं प्रस्तुतकाव्य-समीक्षणेन यत् महाकाव्यमिदं किमपि सुसंघटितं कथाक्रमं कथानकं वा न बिभर्ति। अत्र प्रत्येकसर्गे तत्रापि बहूनां व्यक्तीनां वर्णनं वर्तते आंशिकम्। क्वचित् सामाजिकं वर्णनं वर्तते कुत्रचित् राजनीतिकम्, क्वचित् पुरुषविशेषस्य वन्दना वर्तते।

महाकाव्यस्य प्रथमसर्गे श्रीगणेश-सरस्वती-सूर्यनारायण-परशुराम-धन्वन्तरि-श्रीमहाकाव्यस्य सद्गुरु-भारतमातुश्च वन्दनं वर्तते। तदतिरिक्तमन्येषु विषयेषु अपि श्लोकाः सन्ति। परं प्रधानतया देवतानां च प्रार्थना वन्दनाः वर्तन्ते। अत एव वन्दनासर्गोऽयं कथितः यथा हि –

**द्वैमातुरद्वन्द्वं हर द्विपास्य!**
**पादाब्जयोस्ते विनतिर्ममास्ति।**
**यद् दुस्तरं तर्त्तुमिमं भवाब्धिं**
**प्रदेहि मह्यं त्वमलं बलं भोः।।**[८]

अग्रिमे सरस्वत्याः स्तुतिः, तदग्रे भगवत्याः लक्ष्म्याः प्रभावः, धनोन्मत्तजनानां च स्वभावः आचरणं व्यवहारश्च दर्शितः। सूर्यस्तवने एकविंशतिश्लोकेषु श्रीसूर्यनारायणस्य महिम्नः प्रकाशनं वर्तते –

**श्रीसत्यनारायण सूर्यदेव,**
**सहस्ररश्मे तिमिरापहारिन्।**
**नमो नमस्ते भुवनेश्वराय**
**हिरण्यगर्भाय खगाय पूष्णे।।**

द्वितीयसर्गे सिद्धपुरुषनामात्मके श्रीदातृमहाराजानाम्, श्रीसद्गुरूणाम्, परमयोगिराजानां सुन्दरनाथजिमहाराजानां श्रीमाधवानन्दजिगुरुवर्याणां परमकारुणिकानां श्रीसुन्दरनाथजिमहाराजानां परमयोगिनां स्तुतिं कुर्वन् लिखति –

**अयि हिमपर्वतकल्पितवास**
**महाद्भुत-कार्यसुसाधक हे,**
**प्रतिपलमीश्वर चिन्तनयोजित-**
**नैजमनो नमितेक्षण हे!**
**मसृण-सुमेचक-दीर्घजटावृत-**
**सामि-मुखाम्बुज पातक हे,**
**जय गुरुदेव मनोहर- विग्रह**
**सुन्दरनाथ! कृपां कुरु हे।।**[९]

सुन्दरनाथमहाराजाः सिद्धयोगिराजाः सन्ति, ते सहस्राधिकवर्षायुषः हिमालये योगासनमधितिष्ठन्ति, प्रायः पर्वसु केचन पुण्यवन्तः भाग्यवन्तश्च जनाः मुनयः महात्मानश्च दर्शनं लभन्ते। एतेषामेव परमकारुणिकानां योगिराजानां सुन्दरनाथजिमहाराजानां पट्टशिष्याः सम्प्राप्तगुरुकृपयालौकिकतपःपुञ्जाः सिद्धाः परमश्रद्धेया माधवानन्दजिगुरुवर्याः अभूवन्। श्रीमाधवानन्दजिमहाराजानाम् आश्रमः जयपुरेऽपि अस्ति। एतेषां प्रार्थनां करोति कविः तथा च तदीयस्वरूपमपि चित्रयति –

**आपादशीर्षं विधृतोत्तरीयं**
**सुखासनं दक्षिणहस्तमालम्।**
**श्रीमाधवानन्दगुरो! स्मितास्यं,**
**त्वां स्वामिनं चित्रितमेव नौमि।।**[१०]

गुरुवर्याः श्रीमाधवानन्दचरणाः महोदाराः वर्तन्ते –

**महानुदारः परमो हितैषी**
**सदा स्मितास्यो मितमिष्ट भाषी।**
**भव्याङ्गयष्टी रुचिराभिधानः**
**श्रुतस्य दृष्टोऽपि गुरो! त्वया त्वम्।।**[११]

तदनन्तरं गङ्गेश्वरानन्दचरणानां गुरूणां शास्त्रज्ञानां प्रार्थना विद्यते –

**गङ्गेश्वरानन्दगुरो दयालो नमो नमस्ते।**
**अदृश्य देहोप्यसि सर्ववेत्ता,**
**त्वत्तोऽत्र गुप्तं नहि किञ्चिदस्ति।।**

एवं द्वितीये सर्गे सिद्धमहापुरुषाणां स्तुतयः सन्ति। तृतीये सर्गे श्रीबाबुदेवस्य दित्तं व्यवहारश्च वर्णितो वर्तते। अष्टादशाध्यायेषु विभक्तोऽयं सर्गः। कार्यालयेषु नियुक्तानां कार्यरतानां लिपिकानां व्यवहारः संवादशैल्यां लिखितोऽस्ति। प्रारम्भे देवत्तयज्ञदत्तयोः द्वयोः संवादः भवति। देवदत्तं यज्ञदत्तः शिक्षयति प्रबोधयति उपदिशति च बाबुदेवगीता। तृतीये अध्याये गुरुशिष्ययोः व्यवहारशिक्षात्मकः संवादोऽस्ति –

**यथाऽस्तु लोकव्यवहारदाक्ष्यं**
**शिक्षां तथा चापि ददातु मह्यम्।**
**यतो हि सिद्धिर्न कदापि तस्य**
**जानाति यो न व्यवहाररीतिम्।।**[१२]

तदनन्तरं चतुर्थे अध्याये बाबुदेवस्य सामर्थ्यं प्रदर्शयति –

**विधायको वा सचिवश्च मन्त्री**
**साक्षात् सहायो भविता न कार्ये।**
**बाबुं प्रसन्नं कुरु कार्यसिद्ध्यै**
**सैव प्रयास्ता जनतन्त्रकेऽस्मिन्।।**
**बाबुर्न यावत् तव प्रार्थनायाः**
**पत्रेऽनुकूलं लिखति स्वनोटम्।**
**तावत् तदग्रे सचिवो न मन्त्री**
**न राज्यपालोऽपि करोति किञ्चित्।।**[१३]

अष्टादशपद्येषु श्रीबाबुदेवस्य चरित्रं वर्णितं वर्तते।

चतुर्थे सर्गे गणतन्त्रनामके भारतीयगणतन्त्रस्य महत्त्वं तस्य रक्षणस्य प्रार्थना च विहितास्ति एकषष्टिपद्येषु। ततो गणतन्त्रे भारतीयजनतायाः स्थितिं वर्णयति। गणतन्त्रे कविमतानुसारम् अनेके राजनीतिकदलाः स्वार्थपरायणाः परस्परं कलहायमानाः देशस्य चिन्तां न कुर्वन्ति, अपितु भ्रष्टाचरणाः सन्ति –

**गणा अनेके विपरीतमार्गाः**
**स्वार्थाय नित्यं कलहायमानाः।**
**आश्वास्य मिथ्या जनतामनल्पं**
**कर्त्तव्यमार्गाद् व्यचलन् वराकाः।।**

कविः कथयति यदस्मिन् गणतन्त्रे राजनेतॄणां सर्वकाराणां च दोषाद् अद्य देशे स्त्रियः सुरक्षिता न सन्ति, दुष्कर्म प्रतिदिनं वर्धते, संस्कृतसंस्कृत्योः निरन्तरम् उपेक्षावशात् समाजस्य पतनं भवदस्ति –

**न स्त्री सुरक्षा न च बालरक्षा**
**कष्टे सदा जीवनमेतदीयम्।**
**वृद्धाः कुधियो दुरुक्तैः**
**दुष्कर्मभिश्चाप्यति तत्सपत्नाः।।**[१४]

भारतीयगणतन्त्रस्य दुरुपयोगं कुर्वन्तो राजनेतारः यथेच्छं लुण्ठन्ति। अत एव कविः प्रार्थयति गणतन्त्रदेवं यत् प्रथमम् एतेषां गणनायकानां सुधारः

आवश्यको वर्तते। गणनायकाः यादृशम् आचरन्ति तेषामनुचराः अपि तथैव कुर्वन्ति तथा हि कथितम् कविना **नारायणशास्त्रिणा** काङ्करेण –

**कुर्वन्ति यद् यद् गणनायकाश्च**
**कुर्वन्ति तेषां गणिनोऽपि तत् तत्।**
**अतो हि पूर्वं गणनायकान् नः**
**सुधारय त्वं गणतन्त्रदेव!।।**

गणतन्त्रात्मके भारते कीदृशी श्रेष्ठा स्थितिः स्यादिति आकाङ्क्षायां कविः कामयते – दुर्दशेयं न जायेत परेशं प्रार्थयामहे[१५]।

**मित्रस्य चक्षुषा पश्यन् कुर्यात् सर्वः सहायताम्।**
**शासकः शासितः सर्वः सुमना जायतां सदा।।**
**मिथं वञ्चयतां नासौ स्वीयं कार्यं करोतु च।**
**शिक्षा व्यर्था न दीयेत, जीविका न मिलेद्**
**यया।।**[१६]

सर्गस्यान्ते देशसेवायां संलग्नानां मातृभूमि-स्वतन्त्रतायै कृतप्रयत्नानां पादपद्मेषु प्रणामान् समर्प्य कविः शुभं कामयमानः स्वराज्यप्रशस्तये प्रार्थयति। महाकाव्यस्यास्य पञ्चमः सर्गः स्वतन्त्रतोपरि अस्ति। पञ्चमसर्गस्य चतुर्षु भागेषु सम्भूय श्लोकाः पञ्चपञ्चाशत् सन्ति। अत्र स्वतन्त्रराष्ट्रस्य नागरिकाणां सुखसु-विधयोः वर्णनं वर्तते, द्वितीये भागे विकृतसंस्कृत्याः सामाजिकी समानता, अपराधवृत्तिवृद्धिः, निरङ्कुशशासनम्, सर्वकाराणां निरङ्कुशनियम-निर्माणं स्वेच्छाचारिता च वर्णिता अस्ति। संस्कृतिविस्तारं विलोकयन् कविः चित्रयति दृश्यम् –

**स्थित्वैव तेऽदन्ति च मूत्रयन्ति**
**लज्जा न तेषां पशुवद् विहारे।**
**स्थित्वा कथं ते न हृदन्ति हंहो**
**पृच्छन्त्विदंताननुकारिणो नॄन्।।**[१७]

राजकीयकर्मचारिणः स्वकर्त्तव्यं न पालयन्ति, अनाचारिणो जाताः, कार्यं न कुर्वन्ति, उत्कोचेन अन्यायपूर्वकं धनम् याचन्ते –

**कार्यं न कुर्वन्त्यधिकारिणः स्वं**
**सोत्कोचमर्थार्जन एव लग्नाः।**
**कः कर्मचारी तदधीनतायां**
**तिष्ठन्न सन्तापमुपैति नित्यम्।।**[१८]

महाकाव्यस्य षष्ठसर्गे लोकनायकानाम् अभिनन्दनानि सन्ति। अस्य कथानकम् अभिनन्दनीयश्लोकेषु विश्राम्यते। भारतवर्षे समुत्पन्नानां कतिपयानां राजनेतॄणां जननायकानां वी.वी.गिरिराष्ट्रपतिमहोदयानाम्, इन्दिरागाँधी-राजीवगाँधीत्यादीनां प्रशंसायां श्लोकाः लिखिताः सन्ति। सर्वप्रथमं विनायकानाम् अभिनन्दनं वर्तते। के इमे विनायकाः इति अन्ते स्पष्टम्। पञ्चविंशतिश्लोकेषु जनतन्त्रस्य प्रशंसा, देशस्य दुर्दशा, रामराज्यस्य कामना च कृतास्ति। कविः प्रबोधयति परामृशति च यद् राजनीतिः धर्मविहीना न भवेत् –

**धर्मात् पृथङ्नो नृपनीतिरीक्ष्या,**
**यतस्तथेक्षा क्षतिदाऽस्त्यतीव।**
**धर्मं पुरस्कृत्य हि राजनीत्या,**

**युधिष्ठिरोऽसौ विजयं सुलेभे।।**[१९]

जननायकान् कविः बोधयति यत् भवन्तः तथा चरन्तु येन भवतां निन्दा न स्यात्। लोभाद् भयाद् वा सद्वृत्तिर्न त्याज्या –

**लोभाद् भयाद् वा शुचिता न नैजी**
**कदापि हेयेति सदाऽवधेयम्।**
**सद्वृत्तिमाधाय सदैव वर्त्यम्**
**एवं यशो वर्धत एव नित्यम्।।**
**यथा न निन्दा भवतां क्वचित् स्यात्**
**तथा विधेयं नहि कर्म किञ्चित्।**
**यशोधनानामयशो यतो हि**
**न्यूनं न मृत्योरिति कृष्ण आह।।**[२०]

अस्मिन् एव प्रसङ्गे श्रीनारायणशास्त्रिकाङ्कर: राजस्थानशिक्षामन्त्रिण: श्रीदामोदराचार्यस्य प्रशस्तौ पद्यानि लिखति। संस्कृतसंस्कृतिसंरक्षणपरा: श्रीदामोदराचार्या: सर्वदा स्मरणीया: सन्ति।

सप्तमसर्गस्य कथावस्तु समीक्षाप्रधानं वर्तते। प्रथमखण्डे महाकविकालिदासस्य स्थितिकालं नीत्वा वैदेशिकानां मतं खण्डयति। तेषां मते कालिदासस्य जन्म चतुर्दशशताब्दीत: प्राक् कथित:। अत्र कवि कथयति –

**चतुर्दशशताब्दीतः कालिदासस्य प्राक् स्थितिम्।**
**विक्रमादित्यकालेऽत्र निर्णयन्ति विपश्चित:।।**
**एलिजाबेथसाम्राज्यकाले शिक्षाप्रियः कविः।**
**चतुः शताब्दपूर्वं हि सञ्जातः को न मन्यते।।**[२१]

– शोधच्छात्र:, जगद्गुरुरामानन्दाचार्य-
राजस्थानसंस्कृतविश्वविद्यालय:, जयपुरम्

**सन्दर्भा:**

१. अग्निपुराणम् – ३३८/१८
२. दशरूपकम् – १/११–१६
३. साहित्यदर्पण: – ६/४२
४. तिलक मञ्जरी, पृ.सं. ५२
५. As poet of the novel - E.M. Foster Pae –95
६. The structure of the novel - page 16
७. रचनाभ्युदयं महाकाव्यम् (प्रणेता- म.म. नारायणशास्त्रिकांकर:, प्रकाशनम् – विद्यावैभव- भवनम्, जयपुरम्, 200१ ई.)
८. रचनाभ्युदयम् – १/१/५
९. तत्रैव – १/४/१
१०. रचनाभ्युदयमहाकाव्यम् – २/८/१
११. तत्रैव – २/१०/१
१२. तत्रैव – ३/३/७
१३. तत्रैव – ३/४/१–२
१४. तत्रैव – ४/१/७
१५. तत्रैव – ४/२/२ १/२
१६. तत्रैव – ४/२/१४–१५
१७. रचनाभ्युदयम् – ५/२/६
१८. तत्रैव – ५/२/८
१९. तत्रै – ६/१/१०
२०. तत्रैव – ६/२/४, ६
२१. रचनाभ्युदये – ७/१/११–१२

# सङ्घे शक्तिः कलौ युगे

❑ डॉ. पवनकुमारशर्मा

वर्तमानसमये संघटनस्य अति महत्ता अस्ति। एकमतिं प्राप्तानां सर्वेषां जनानां लक्ष्यं प्रति सङ्घटिता शक्तिः एव एकता अभिधीयते। एकता एव सा महाशक्तिः यया सर्वाणि दुष्करकर्माणि सम्पाद्यन्ते। इयम् एकता एव लोकं, समाजं, देशं विश्वं च प्रगतिपथमधिरोहयति। वर्तमानयुगे तु एकतायाः महत्त्वं सर्वोपरि वर्तते। एकतायाः अभावे स्वकीयानाम् अधिकाराणां रक्षणं नैव सम्भवं वर्तते। एकाकिनः किमपि कार्यं न तथा फलदायकं यथा संघस्य। उक्तञ्च –

पुरा एकस्मिन्नाश्रमे कश्चित् महर्षिः वसति स्म। स अतीव चतुरः विपश्चिच्चासीत्। कुशलोऽयम् अध्यापकः इति तस्य कीर्तिः। महर्षिः सर्वेषां जनानां पूजास्थानम् अभवत्। तत्र छात्राः विविधाः विद्याः अशिक्षन्त। सर्वेषु छात्रेषु स महर्षिः अस्निह्यत् विद्यां च व्यतरत्। तस्य महर्षेः चत्वारः चतुराः पुत्राः आसन्। यदा महर्षिः वृद्धोऽभवत् तदा स्वपुत्रान् अवदत्–अयि पुत्राः, मम निधनकालः समागतः। अस्मात् मृत्यु–लोकाद् देव–लोकं प्रति प्रस्थितोऽहम्, न केनापि शोचनीयं मे मरणम्। ईश–कृपया सुखेन एतत् जडशरीरं त्यजामि। यूयं पुनः अस्मिन् आश्रमे धर्मेण व्यवहरत। युष्मासु न कदापि मतिभेदाः भवन्तु। उक्तं हि **'संहतिः कार्यसाधिका'** इति। अतः आनयत एकं काष्ठ–भारम्, अत्रैव संहतेः महत्त्वं दर्शयामि।

तदा महर्षेः पुत्रैः काष्ठ–भारः आनीतः। महर्षिः तान् आदिशत् 'एतं बद्धं काष्ठभारं यूयमेकैकशः खण्डयत' इति। तदनुसारेण एकैकः पुत्रः काष्ठ–भारं खण्डयितुम् आरभत। परं नैकोऽपि तस्य खण्डने समर्थः। अनन्तरं भार–युक्तानि काष्ठानि पृथक् कृत्वा खण्डयितुं तान् सर्वान् आज्ञापयत्। तदनुसारेण तानि सर्वाणि काष्ठानि तैः खण्डितानि। तदा स महर्षिः अवदत् 'अयि पुत्राः! पश्यतैतं संहत्याः प्रभावम्।' यावत् काष्ठानि संहतानि तावत् तेषां भारं खण्डयितुं यूयम् असमर्थाः, तथैव यावद् यूयं संहताः तावन्न कोऽपि–शत्रुर्युष्माकं विनाशाय अलम्। अत एव अधः कथितं कविवचनं चित्ते धारयत। एतस्मिन् आश्रमे च सुखेन व्यवहरत।

**सङ्घेन सृष्टिः प्रसृता स्वभावात् ,**
**सङ्घेन सत्त्वा विपिने वसन्ति।**
**सङ्घेन सौख्यं मनुजा लभन्ते,**
**सङ्घेन राष्ट्रं भजते प्रभुत्वम्।।**

अतश्च सत्यमुक्तं केनापि–'सङ्घे शक्तिः कलौ युगे' इति।

– पूर्व–शोधार्थी,
जगद्गुरु–रामानन्दाचार्य–राजस्थान–संस्कृत–
विश्वविद्यालये, जयपुरम्।

संस्कृतसमाचाराः

# अन्तर-राष्ट्रिय-संस्कृतसम्मेलनं सम्पन्नम्

जयपुरस्थस्य राजस्थानविश्वविद्यालयस्य संस्कृतविभागेन अगस्तमासस्य ९-११ दिनाङ्केषु 'सार्वभौमिकवैदिकज्ञानपरम्परा महर्षिदयानन्द-सरस्वती च' इति विषयमवलम्ब्य एकम् अन्ता-राष्ट्रियसंस्कृतसम्मेलनम् आयोजितम्। उद्घाटन-कार्यक्रमे म.म. श्रीगौतमपटेलः (गुजरातसंस्कृत-अकादम्याः अध्यक्षचरः) आ. श्रीनिवासबरखेडी (कुलपतिः, केन्द्रीयसंस्कृतविश्वविद्यालयः, दिल्ली), आ. सच्चिदानन्दमिश्रः (सदस्य-सचिवः, भारतीयदर्शनानुसन्धानपरिषद्, दिल्ली), डॉ. सौम्यागुर्जरः (जयपुरग्रेटर-महापौरः, संस्कृतच्छात्रा च) आ. अल्पना कटेजा (कुलपतिः, राज.वि.वि.), आ. राजेशकुमारः (संस्कृत-विभागाध्यक्षः सम्मेलनसंयोजकश्च) वेदिकायाम् आसन्।



सम्मेलनेऽस्मिन् विभिन्नसत्रेषु आ. महावीरप्रसाद अग्रवालः (हरिद्वारम्) आ. मुरलीमनोहरपाठकः (कुलपतिः ला.ब.शा.के.सं.वि.वि.दिल्ली) आ. हरेरामत्रिपाठी (कुलपतिः कुलगुरुकालिदास सं.वि.वि. रामटेक) आ. गोपबन्धुमिश्रः (कुलपतिचरः सोमनाथ सं.वि.वि. अध्यक्षश्च संस्कृतभारत्याः) इत्यादयः प्राचीनभारतीयज्ञानपरम्परायां स्त्रीशिक्षायां च महर्षिदयानन्दस्य योगदानविषये सत्यार्थप्रकाशस्य प्रतिपाद्यविषये च स्वविचारान् प्रकटीचक्रुः। त्रिषु दिवसेषु अष्टसत्रेषु प्रायशः २०० विद्वांसः स्वशोधपत्राणि पठितवन्तः। संस्कृतसंवर्द्धनाय सम्मेलने एकः प्रस्तावोऽपि पुरस्तात् पारितः।

सम्मेलने आगतानाम् अतिथीनां विदुषां विभागास्य पूर्वछात्राणां (ALUMINI) च उत्तरीयश्रीफलप्रदानपूर्वकं सम्माननमपि कृतम्। सम्मेलने उपस्थितेषु विद्वत्सु अन्यतमाः आसन्- आ. वीरेन्द्र अलंकारः (चण्डीगढ) डॉ. राजेश्वरीभट्टः (जयपुरम्) आर. रामनाथ झाः (नवदेहली), आ. मो. शरीफः (अलीगढ), आचार्य-श्रीकृष्णशर्मा, आ. राजेन्द्रप्रसादशर्मा (जयपुरम्), आ. सुदेषणा भट्टाचार्यः (गुवाहाटी), आ. रमाकान्तपाण्डे (भोपाल), आ. सतपालसिंहः (दिल्ली), आ. शुचिता ला. दलालः (नागपुरम्), आ. डैनियल रावेहः (इस्रायल आभासिकरूपेण), आ. काशीनाथन्यौपाने (नेपाल), आ.ब्रह्मदेवविद्यालंकारः, आ. सुरेन्द्र-कुमारशर्मा (रोहतक), आ. श्रीप्रकाशरामः (आरा), आ. बीना अग्रवालः (जयपुरम्), आ. रामसुमेरयादवः (लखनऊ), आ.बलवीर आचार्यः (रोहतक) प्रभृतयः।

समारोपकार्यक्रमस्य संचालनम् आचार्य-**श्रीकृष्णशर्मणा** (भारती-स्वरमङ्गलासंपादकेन) कृतम्, स्वागतभाषणं **डॉ. नाथूलालसुमन** (संयुक्तसचिवचरः, उच्चशिक्षा राजस्थानम्) द्वारा विहितम्।

**जयपुरे त्रिदिवसीयसंस्कृतसम्मेलने पारितः प्रस्तावः -**

वर्षानुवर्षं संस्कृतच्छात्राणां ह्रासमानां संख्यां विलोक्य चिन्तातुराः सम्मेलने समुपस्थिताः वयं सर्वेऽपि विद्वांसः, प्राचार्या आचार्याश्च राज्यसर्वकारं प्रार्थयामहे -

१. माध्यमिकविद्यालयेषु तृतीयभाषारूपेण पूर्ववत् अनिवार्यतया संस्कृतभाषा पाठ्यक्रमे सम्मिलिता भवेत्। वैदेशिकभाषाणां विकल्पाः समापनीयाः।

२. अधिकाधिकमाध्यमिकविद्यालयेषु महाविद्यालयेषु च संस्कृतं वैकल्पिविषयरूपेण पाठ्यक्रमे सम्मिलितं भवेत्।

३. विज्ञान-वाणिज्य-अभियान्त्रिकी-कृषि-चिकित्सा-विधि-शिक्षासंस्थानेषु नूतनशिक्षानीत्यनुरूपं संस्कृतमपि अनिवार्यविषयरूपेण वैकल्पिकविषयरूपेण च पाठनीयम्।

४. संस्कृतपाठ्यक्रमे आयुर्वेद-ज्योतिष-वास्तु-योगादीनाम् अंशाः सम्मिलिताः भवेयुः।

५. राज्यप्रशासनिकसेवायाः मुख्यपरीक्षायां संस्कृतमपि पूर्ववत् वैकल्पिकविषयो भवतु।

६. विविधप्रतियोगिपरीक्षाणाम् अनिवार्यविषयेषु नैतिकशिक्षारूपेण संस्कृतग्रन्थानामंशाः सम्मिलिताः भवेयुः।

७. संस्कृशिक्षाशास्त्री (B.Ed.) पाठ्यक्रमे सामान्यधारायाः संस्कृतस्नातका अपि (50%) प्रवेशार्हाः भवेयुः।

८. राजस्थानराज्ये सर्वत्र तहसीलस्तरे वरिष्ठोपाध्यायविद्यालयाः शास्त्रिमहाविद्यालयाश्च स्थापनीयाः।

९. विद्यालयेषु महाविद्यालयेषु च संस्कृतभाषां साहित्यं च आधारीकृत्य प्रश्नावली-वादविवाद-निबंधलेखन-संभाषणादीनां प्रतियोगिता आयोजनीयाः।

१०. शिक्षासंस्थानेषु संस्कृतसुभाषितानां नीतिपद्यानां च भित्तिलेखनं भवेत्।

- प्रोफेसर- **राजेशकुमारः**,
सम्मेलनसमन्वयकः
संस्कृतविभागाध्यक्षश्च,
राजस्थानविश्वविद्यालयः, जयपुरम्।

## रेवासा-पीठाधीश्वराः ब्रह्मलीनाः



स्वामिनो रेवासा-पीठाधीश्वराः, 'भारती' संस्कृत-मासपत्रिकायाः संरक्षकाः, राजस्थान-संस्कृत-अकादम्या अध्यक्षचराः, वेदविद्यालयानां संरक्षणेऽनवरतं तत्परा एकसप्ततिवर्षदेशीया नानाशास्त्रनिष्णाता वेदान्तिनो **डॉ. राघवाचार्य-महाराजाः** 30.08.2024 दिनांके प्रातः 05 वादने हृदयगत्यवरोधेन ब्रह्मलीना अभवन्- इति श्रुत्वा न केवलं संस्कृतजगति, न वा राजस्थानेऽपितु सम्पूर्णे राष्ट्रे व्यापकः शोकः सञ्जातः। 'भारती' पत्रिका-परिवारः सादरमेभ्यः श्रद्धाञ्जलीन् अर्पयति।

- सम्पादकः

पुस्तकसमीक्षा

# डॉ. हर्षदेवमाधवस्य नवीना कृतिः

❑ महामहोपाध्यायदेवर्षिकलानाथशास्त्री

प्राचीनायामस्माकमुपास्यायां संस्कृतभाषायां नवीनतमाः काव्यविधाः कविवर्यैर्विलिख्यन्ते इत्यस्माभिर्बहुधाऽभिव्यक्तमेव। संस्कृते जापानदेशोद्भूता काव्यविधा 'हाइकु' बहोः कालाद् विरच्यते, अन्या अपि नूतनविधा विलिख्यन्ते। एवं विधानामाधुनिककाव्यविधानां प्रस्तोतृष्वग्रणीरस्ति विश्रुतः कविमूर्धन्यो **डॉ. हर्षदेव माधव** इति जानन्त्येव संस्कृतसेविनः। डॉ. हर्षदेवमाधवः केन्द्रीयसाहित्यअकादम्या संस्कृतकवित्वाय सम्मानितपूर्व इत्यपि जानन्ति विद्वांसः। कविप्रवरायास्मै नूतनतमः पुरस्कारः केन्द्रीय-साहित्यअकादम्या प्रत्तोऽस्ति संस्कृते बालसाहित्य-सर्जनस्य कृते इति वृत्तमाकर्ण्य प्रहृष्टा वयं वर्धापयामः कविवर्यमेनम्।

कविवर्यस्य डॉ. हर्षदेवमाधवस्य त्रिंशत् काव्यसंग्रहाः प्रकाशितचराः, साम्प्रतमेकत्रिंशत्तम आधुनिककाव्यसंग्रहः प्रकाशमायात इत्यपि हर्षास्पदम्। 'हाइकु' कविता संग्रहस्यास्य शीर्षकमस्ति **'शाखान्तरालानां गगनखण्डाः।'** हाइकुकविताविधा केवलं सप्तदशाक्षरा वृत्तिः, पंक्तित्रये विरच्यते। विधायामस्यां कविवर्यस्यास्य बहवः काव्यसंग्रहाः पूर्वमपि प्रकाशितचराः। काव्यविधाया अस्याः समालोचनायै संग्रहेऽस्मिन् प्रारम्भे स्वयं कविवर्यस्यास्य अष्टौ निबन्धा ग्रन्थस्यादौ प्रकाशिताः सन्ति येषु सोदाहरणं स्वकायहाइकुकाव्यस्य विशिष्टायाः प्रकृतेर्हिन्दी-भाषायां विवरणं प्रत्तमस्ति।

एतदनन्तरमन्येषां विवेचकानां सप्तलेखा हिन्दीभाषायामाङ्गलभाषायां च डॉ. हर्षदेवमाधव-विरचितानां हाइकुकवितासंग्रहाणां परीक्षणं कुर्वाणाः प्रकाशिताः सन्ति। एतेषु विवेचकेषु प्रो. मंजुलता शर्मा, प्रो. सुदेश आहूजा, राजेश भायानी, डॉ. अरुण कुमार निषाद, डॉ. रीता त्रिवेदी प्रभृतयः समालोचकाः परिगणनीयाः सन्ति।

इत्थं प्रारम्भे खण्डद्वयं विवेचनात्मकमस्ति, प्रथमे स्वयं कविवर्यस्य निबन्धा हाइकुकाव्ये झेन(ज्ञान) तत्त्वस्य विवेचनं कुर्वन्ति, हाइकुकवीनां रचनासु ऋतुवर्णनस्योदाहरणानि प्रस्तूय स्वकीय-काव्ये ऋतुवर्णनस्योदाहरणान्यपि प्रस्तुवन्ति, हाइकुकाव्येषु विभिन्नकलानां चित्राणि कथं दृश्यन्ते इति प्रदर्शयन्ति। द्वितीयखण्डे विभिन्ना विवेचका हर्षदेवमाधवीयहाइकुकाव्येषु चन्द्रमसश्चन्द्रिकायाश्च वर्णनं कुत्रास्ति, वर्षर्तोर्वर्णनं कुत्रास्ति, नगरजीवनं कथं चित्रितमित्यादिविषयान् विवेचयन्ति।

तृतीये खण्डे डॉ. हर्षदेवमाधवस्य 338 हाइकुरचनाः प्रकाशिताः सन्ति। विदन्त्येव काव्यरसिका यत् हाइकुरचनायां प्रथमपङ्क्तौ पञ्च, द्वितीयपङ्क्तौ सप्त, तृतीयपङ्क्तौ पञ्च इत्येवं केवलं सप्तदशाक्षराणि भवन्ति। केवलं सप्तदशाक्षरेषु कथ्यस्य पूर्णता, पङ्क्तित्रये विभाजनं च कियत् काठिन्यमादधातीति स्पष्टमनुमातुं शक्यते। ग्रन्थेऽस्मिन् प्रतिपृष्ठं प्रत्येकरचनया सह तत्समक्षं

तस्या हिन्द्यामनुवादोऽपि मुद्रितः। कविवर्येण तादृशाः पाणिनीया धातवोऽपि प्रयुक्ताः सन्ति ये सामान्यतो न दृश्यन्ते प्रयुक्ताः। तेषां सूचनाऽपि प्रारम्भे रचनाया उपरि प्रत्ताऽस्ति। यथा 'पुट संश्लेषणे' (6) सकर्मको धातुः प्रयुक्त एवम्

**पुटति मनः**
**स्मृतिभिर्मा विरुतं**
**श्रुत्वा पिकस्य।** (245)

कोयल की कूक सुनकर मन मुझे स्मृतियों से जोड़ देता है।

ग्रन्थस्य शीर्षकं प्रेरयन्ती रचनाऽस्त्यावरणपृष्ठे

**मुद्रिता**
**सन्धातुमीहे**
**विटपान्तरालानां**
**गगनखण्डान्।**

मैं जोडना चाहता हूँ वृक्षों के मध्यवर्ती आकाश के खण्ड-खण्ड टुकड़ों को।

स्वागतमस्य रचनासंग्रहस्य विधास्यते संस्कृतजगतेति स्पष्टमेव।

**शाखान्तरालानां गगनखण्डाः**, कविः डॉ. हर्षदेव माधवः, हिन्दी अनुवादः आचार्या डॉ. इला घोष, सम्पादिका सुश्री डॉ. भावना सोनी, प्रकाशक- परिमल पब्लिकेशन, २७-२८, शान्तिनगरम्, दिल्ली-११०००७, पृ.सं. २४०, मूल्यम् ४००/-

# श्रीराम-जानकी-स्तवनम्

❑ प्रो. डॉ. योगिनी एच. व्यासः

**त्रैलोक्यवर्तिजनसन्ततिपूज्यपादम्**
**भक्तालिकांक्षित वरप्रदकल्पवृक्षम्।**
**प्रज्ञाप्रदाननिपुणं कलितात्मतत्त्वम्**
**जानाति को न भुवि सत्यपराक्रमं त्वाम्।।**

**भक्ताखिलेष्टवरदायिकृपाम्बुराशिम्**
**सम्पूजितो दिशति वांछित-सिद्धिबुद्धिम्।**
**त्वत्तेजसा जगदिदं प्रतिभाति नित्यम्**
**जानाति को न भुवि सत्यपराक्रमं त्वाम्।।**

**रम्यस्वभाववपुषं कृतकृत्यताढ्यम्**
**आनन्ददायनपटुं हृतसर्वशोकम्।**
**नम्रेष्टदाननियमाभयदानदीक्षम्**
**रामं नमामि शिरसा रमणीयवेषम्।।**

**ब्रह्माण्डकोटिजननीमनिलात्मजार्च्याम्**
**कारुण्यजन्मधरणीं धरणीतनूजाम्।**
**गीर्वाणपूजितपदां सुषमाढ्यकायाम्**
**श्रीमैथिलीं हृदि सदा कलयेऽहमम्बाम्।।**

**सुग्रीवबालिसुतजाम्बवदर्च्यपादाम्**
**ॐकारमुख्यमुदितां प्रणवस्वरूपाम्।**
**योगीन्द्रपूज्यचरणां भवभीति-हन्त्रीम्**
**पृथ्वीसुतां हृदि सदा निदधेऽहमम्बाम्।।**

- (नि.) संस्कृतविभागाध्यक्षः,
उमा आदर्श कॉलेज, गांधीनगरे, गुजरातराज्यम्

नारी-स्तम्भः

# भास्वती मनुभाकरः

❑ डॉ. राजेश्वरी भट्टः

दृढ़संकल्पेन महता श्रमेण च फ्रांसदेशे प्रसिद्धे पेरिसनगरे 2024 तमे वर्षे समायोजितायां अन्ताराष्ट्रियक्रीड़ाप्रतियोगितायां 'एयरपिस्टल-शूटिंग' स्पर्द्धायां द्वे कांस्यपदके विजित्य बहुमुखीप्रतिभासम्पन्ना 'सुश्री-मनुभाकर' भारतदेशस्य महतीं कीर्तिमकलयत्। विश्वस्तरीये, भव्ये महनीये च अस्मिन् समारोहे कांस्यपदकद्वयेन सम्मानिता भास्वती 'मनुभाकर' नूनं स्वकीयस्य नाम्नोऽन्वर्था स्वतन्त्रभारते 'एयरपिस्टलशूटिंग' क्षेत्रे प्रथमा महिला क्रीडकारूपेण समादृताऽभवत्। 18 फरवरी 2002 तमे वर्षे 'हरियाणा' प्रदेशे झज्जर इति नगरे 'गोरिया' ग्रामे लब्धजन्मा सततं विकासोन्मुखी मनुभाकर बाल्यादेव बहुमुखी प्रतिभासम्पन्नाऽस्ति। औपचारिकेणाध्ययनेन सह शिक्षणेतरगतिविधिषु यथा टेनिस, स्वीमिंग, स्केटिंग, बॉक्सिंग, मार्शल आर्ट इत्यादिष्वपि इयं पदमकरोत् प्रशंसनीया च जाता। अध्ययनक्रमे जीवविज्ञानविषये बालिकाया विशिष्टा रुचिरासीत्। एकदा 'मनुभाकर' शिक्षिकारूपेण विद्यालये कार्यं कुर्वत्या मात्रा सह विद्यालयं प्रस्थितवती तत्र इयं विद्यालयस्य पार्श्वभागे स्थिते लक्ष्यसंधानक्षेत्रे प्रविश्य सहसा 'एयरपिस्टल' इति शस्त्रं गृहीत्वा लक्ष्यभेदं कृतवती। बालिका मनुभाकर महाभागाया लक्ष्यसंधानकौशलेनाभिभूतः शिक्षकः, तत्रोपस्थिता जनाश्च चमत्कृता जाताः। शिक्षकस्य आग्रहेण तद्दिनादेव एयरपिस्टलक्षेत्रे असाधारणनैपुण्यं अधिगन्तुं मनोः लक्ष्यं जातम्। सम्प्रति 'एयरपिस्टलशूटिंग' क्रीडायां पुत्र्याः असाधारणनैपुण्यं दृष्ट्वा पित्रा उदीयमानायाः पुत्र्याः कृते, 'एयरपिस्टल' उपहारीकृतः। एवं चतुर्दशवर्षस्य वयस्येव 'मनुभाकर' लक्ष्य-संधानक्षेत्रे संलग्नाऽभवत्। अचिरमेव राज्यस्तरीयायां 'एयरपिस्टलशूटिंग' प्रतियोगितायां विजयिनी-रूपेण स्वर्णपदकं प्राप्तवती। सम्प्रति शूटिंगक्षेत्रे मनुभाकरमहाभागायाः प्रशंसनीयेन प्रदर्शनेन सम्मानस्य परम्परा वर्धमानाऽऽसीत्। 2017 तमे वर्षे 'मनुभाकर' स्वर्णपदकेन भूषिता जाता। लक्ष्यं प्रति सततं अग्रे गच्छन्ती 'मनुभाकर' 2018 तमे वर्षे 'चीन-देशे' आयोजिते विश्वकपसमारोहे शूटिंगक्षेत्रे स्वर्णपदकं विजित्य महिममण्डिता जाता। एतदतिरिक्तं 2018 तमे वर्षे आत्मनोऽसाधारणलक्ष्यसंधानकौशलेन विभिन्नासु प्रतियोगितासु विजयमधिगम्य स्वर्णपदकानि च विजित्य 'मनु' विश्वस्य यूनां कृते प्रेरणायाः स्रोतोऽस्ति। उत्कृष्टलक्ष्य-साधिकाया मनोः प्रदर्शनेन गौरवान्वितः

**प्रधानमन्त्री नरेन्द्रमोदी महोदयः राष्ट्रपतिः द्रौपदीमुर्मू-महाभागा च तां वर्धापनवचनैः सभाजयामासतुः।**

### हिन्दी अनुवाद

दृढ़संकल्प एवं घोर परिश्रम से फ्रांसदेश के पेरिस नगर में 2024 ई. में समायोजित अन्तरराष्ट्रीय ओलम्पिक क्रीड़ा प्रतियोगिता में 'एयरपिस्टल शूटिंग' स्पर्धा में दो कांस्य पदक जीतकर बहुमुखी प्रतिभा सम्पन्ना कुमारी 'मनुभाकर' ने भारतदेश का महान् गौरव वर्धित किया है। विश्वस्तरीय भव्य एवं महनीय समारोह में दो कांस्य पदक से सम्मानित मनुभाकर ने निश्चय ही अपने नाम को सार्थक किया है तथा स्वतन्त्र भारत में 'एयरपिस्टल शूटिंग' क्षेत्र में प्रथम महिला खिलाड़ी के रूप में सम्मानित हुई है। 18 फरवरी 2002 ई. में हरियाणा प्रदेश के झज्जर नगर में स्थित 'गोरियां' गाँव में उत्पन्न निरन्तर बचपन से ही बहुमुखी प्रतिभा सम्पन्ना है। औपचारिक अध्ययन के साथ ही शिक्षणेतर गतिविधियों जैसे टेनिस, स्वीमिंग, स्केटिंग, बॉक्सिंग, मार्शल आर्ट आदि में इनकी भागीदारी रही है एवं प्रशंसित हुई है। अध्ययन काल में जीव विज्ञान विषय में मनुभाकर की विशिष्ट रुचि रही है। एक दिन बालिका मनुभाकर अपनी माता के साथ, जो एक विद्यालय में शिक्षिका थी, प्रसंगवश विद्यालय चली गई। वहाँ विद्यालय के पार्श्व भाग में स्थित लक्ष्यसंधान क्षेत्र को देखा एवं जिज्ञासावश एयरपिस्टल को उठाकर लक्ष्य भेद किया। बालिका मुनभाकर के लक्ष्यसंधान कौशल से अभिभूत शिक्षक ने मनु को 'एयर पिस्टल शूटिंग' विद्या सीखने के लिए आग्रह किया। उसी दिन से 'एयरपिस्टल शूटिंग' में असाधारण निपुणता प्राप्त करना 'मनुभाकर' का लक्ष्य बन गया एवं चौदह वर्ष की आयु में ही मनु लक्ष्य संधान क्षेत्र में निपुणता प्राप्त करने में संलग्न हो गई। शूटिंग क्षेत्र में शीघ्र ही मनु भाकर ने राज्य स्तर पर विजय प्राप्त की। सम्मान की यह शृङ्खला दिनों दिन बढ़ती गई। 2017 ई. में केरल में आयोजित 'नेशनल शूटिंग चैम्पियनशिप' समारोह में अपने श्रेष्ठ प्रदर्शन के कारण मनुभाकर स्वर्णपदक से सम्मानित विजेत्री बनी। अपने लक्ष्य के प्रति निरन्तर अग्रेसर मनुभाकर चीन देश में आयोजित 'विश्व कप समारोह' में शूटिंग प्रतियोगिता में स्वर्ण पदक प्राप्त कर महिमा मण्डित हुई। इसके अतिरिक्त 2018 ई. में अपने असाधारण लक्ष्यसंधानकौशल से विभिन्न प्रतियोगिताओं में स्वर्णपदक प्राप्त कर विश्व के युवा खिलाड़ियों के लिए पथप्रदर्शिका के रूप में अनुकरणीया बनी। उत्कृष्ट लक्ष्यसाधिका मनुभाकर के प्रदर्शन से गौरवान्वित प्रधानमंत्री नरेन्द्र मोदी ने एवं राष्ट्रपति द्रौपदी मुर्मु महोदया ने उनको बधाई सन्देश से सम्मानित किया है।

– पूर्व-संस्कृतविभागध्यक्षा,
लालबहादुरशास्त्रिकॉलेजः, जयपुरम्।

आयुर्वेद-स्तम्भः

# वर्षासु दधि भुञ्जीत

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**आयुर्वेदे तु विशिष्टं प्रयोजनं परिणामञ्चाभिलक्ष्य सरण्येका सुकल्पिता यत्र हि परस्परमाश्रयाश्रयिभावो दृश्यते, सरण्यामस्यां शरीरं, शरीरस्थाः दोषाःधातवश्च, लोके समुत्पन्नानि च द्रव्याणि सन्ति। सर्वेष्वेतेषु पाञ्चभौतिकत्वमवलोक्यते। शरीरे तु प्रतिक्षणमेव शीर्णनं भवति, तत्तु तात्त्विकरूपेण पञ्चभूतात्मकमेव, शीर्णतत्त्वानां पूर्त्यर्थम् आहारो गृह्यते सोऽपि पञ्चभूतात्मक एव।**

आयुर्वेद में तो विशिष्ट प्रयोजन को देखकर एक सरणी की (क्रम की, विधि की) कल्पना की गई है जिसमें कि परस्पर आश्रयाश्रयीभाव देखा जाता है, इस सरणी में (क्रम में) शरीर, शरीरस्थ दोष एवं धातु तथा लोक में समुत्पन्न द्रव्य हैं। इन सब में पाञ्चभौतिकता देखी जाती है। शरीर में तो प्रतिक्षण ही शीर्णन होता है, वह तो तात्त्विकरूप से पञ्चभूतात्मक ही है, शीर्णतत्त्वों की पूर्ति के लिए आहार का ग्रहण किया जाता है वह भी पञ्चभूतात्मक ही है।

**अनेनाहारेण कदाचित् शीर्णतत्त्वानां सर्वथा पूरणं सम्यक्तया भवति कदाचिच्च न भवति कदाचित्तु पूरणमधिकं भवति। तेनाहारेण शरीरस्थानां तत्त्वानां क्रमश आरोग्यस्वरूपात्मकं साम्यं, विकृतिसंसूचकः क्षयो भवत्यधिकेन च पूरणेन तेषां तत्त्वानामाधिक्यं जायते तदपि विकृतिसंसूचकमेव। एतेषां त्रयाणां स्वरूपाणां संसूचकास्तु पञ्चमहाभूतानां प्रतिनिधयः दोषा एव भवन्ति। आचार्यैस्तेषां दोषाणां क्षयवृद्धिसाम्यानां लक्षणानि पृथक्-पृथग् रूपेण निर्दिष्टानि। द्रव्याणां ये गुणाः प्रोक्तास्ते तु शरीरे प्रयोगानन्तरं परिणामान्ते प्राप्ता एव भवन्ति। महर्षिः वाग्भटः कथयति यत् -**

**जाठरेणाग्निना योगाद्यदुदेति रसान्तरम्।
रसानां परिणामान्ते स विपाक इति स्मृतः।।**
(अ.हृ.सू.9/20)

इस आहार से शीर्णतत्त्वों का सर्वथा पूरण सम्यक् प्रकार से होता है और कभी नहीं भी होता तथा कभी अधिक पूरण हो जाता है। उस आहार से शरीरस्थ तत्त्वों का क्रमशः आरोग्यस्वरूपात्मक साम्य, विकृतिसंसूचक क्षय होता है तथा अधिक पूरण से उन तत्त्वों की अधिकता हो जाती है वह भी विकृतिसंसूचक ही है। इन तीनों स्वरूपों के संसूचक तो पञ्चमहाभूतों के प्रतिनिधि दोष ही होते हैं। आचार्य के द्वारा उन दोषों के क्षय, वृद्धि तथा साम्य के लक्षणों को पृथक्-पृथक् रूप से निर्दिष्ट किया है। द्रव्यों के जो गुण कहे गए हैं वे तो शरीर में प्रयोग करने के बाद प्राप्त होने वाले परिणाम के अन्त में ही प्राप्त होते हैं।

महर्षि वाग्भट कहते हैं कि -

जाठराग्नि के योग से जो रसों के परिणाम के अंत में अन्य रस प्राप्त होता है वह विपाक माना गया है।

**शरीरे प्रयुक्तानां द्रव्याणां परिणामप्राप्तौ तु देशकालादीनां संस्कारस्य चापि हेतुत्वं वर्तते, द्रव्येषु गुणा अपि भवन्ति दोषा अपि च। दोषाणां निवारणार्थं संस्कारो निर्दिष्टः, द्रव्यान्तरसंयोगेन चापि गुणानामभिवर्धनं दोषाणाञ्च निवारणं क्रियते। एतद्धि वर्णनमत्र विशिष्टं द्रव्यं दध्यभिलक्ष्य कृतम्, यतो ह्याहारेण सह प्रायः- दधि सर्वत्रैवोपयुज्यते, प्रायश्च सर्वदैवोपयुज्यते।**

शरीर में प्रयुक्त द्रव्यों के परिणाम की प्राप्ति में तो देश-काल इत्यादि का तथा संस्कार का भी हेतुत्व होता है, द्रव्यों में गुण भी होते हैं और दोष भी होते हैं। दोषों के निवारण के लिए संस्कार कहा गया है, द्रव्यान्तरसंयोग से भी गुणों का अभिवर्धन और दोषों का निवारण किया जाता है। यहाँ पर यह विशिष्ट वर्णन विशिष्ट द्रव्य दधि को ध्यान में रखकर किया गया है क्योंकि आहार के साथ प्रायः दधि सर्वत्र ही प्रयुक्त किया जाता है और प्रायः सर्वदा ही प्रयुक्त किया जाता है।

**वेदेषु ये मन्त्राः सन्ति तेषां भिन्न-भिन्नमन्त्राणां द्रष्टारस्तु विभिन्नाः महर्षय आसन्निति वेदविदो वदन्ति, आयुर्वेदस्योपदेष्टारः भरद्वाज-धन्वन्तरि-आत्रेय-अग्निवेश-सुश्रुत-चरक-वाग्भटादय आसन्नित्युपदिशन्त्यायुर्वेदविदः, वर्तमानकाले तु दृश्यते यदाविष्कृततमे नवीनेऽन्तर्जालाख्यशास्त्रे (Internet) त्वपरिसंख्येया उपदेष्टारः सन्ति, 'गूगल' एव परमं प्रमाणमिति मन्यमानाः तदनुयायिनोऽप्यपरिसङ्ख्येया एव। इण्टरनेट-इत्यत्र तु स्वास्थ्यसम्बन्ध्युपदेष्टारोऽप्यसङ्ख्येया एव, तत्र च बहुद्रव्यविकल्पत्वाद्योगसङ्ख्या न विद्यते, द्रव्याणामुपयोगक्रमेऽपि तेषां वचनान्युल्लेखनीयानि।**

वेदों में जो मन्त्र हैं उन भिन्न-भिन्न मन्त्रों के द्रष्टा तो विभिन्न महर्षि थे, ऐसा वेद को जानने वाले कहते हैं। आयुर्वेद के उपदेष्टा भरद्वाज-धन्वन्तरि-आत्रेय-अग्निवेश-सुश्रुत-चरक-वाग्भटादि थे, ऐसा आयुर्वेद को जानने वाले कहते हैं, वर्तमानकाल में तो देखा जा रहा है कि आविष्कृततम नवीन अन्तर्जाल (Internet) नामक शास्त्र में तो उपदेश करने वाले असंख्य है। 'गूगल' ही परम प्रमाण है, ऐसा मानने वाले उसके अनुयायी भी अपरिसङ्ख्येय ही हैं। इण्टरनेट पर तो स्वास्थ्यसम्बन्धी उपदेश देने वाले भी असंख्य ही हैं और द्रव्य अनेक होने के कारण इस इण्टरनेट पर इनके द्वारा बताए जाने वाले योगों की तो संख्या ही नहीं है अर्थात् वे भी असंख्य हैं, द्रव्यों के उपयोग के क्रम में भी उन इण्टरनेट के उपदेष्टाओं के वचन भी उल्लेखनीय हैं।

**गतदिवसेषु 'व्हाट्स्-एप' इति विख्याते दुर्ख्याते वा शास्त्रे मया पठितम् यद् 'वर्षासु दधि न भुञ्जीत', पठित्वा चान्तर्जालशास्त्रस्याप्यवगाहनं**

**कृतम्, तत्राप्येवमेवोल्लिखितमाहार-विशेषज्ञैः, तत्रायुर्वेदभिषग्भिरपि लिखितं यद् वर्षासु दधि हानिकारकं भवति, आश्चर्यचकितेन मया य उपदेशः पठितः स तु बारं बारमनेकैरायुर्वेदाध्यापकैरपि भिन्न-भिन्नप्रकारेणानेकैर्लेखैर्निर्दिष्टः, दुःखस्त्वनेनाधिको जातः यतो हि स्वनाम्ना पूर्वं चाकचक्यान्वितं प्रोफेसर इति पारिभाषिकं विशिष्टं पदमलङ्कुर्वाणैरेभिरायुर्वेदाध्यापकैरेतदपि लिखितं यद्दधि तु शीतवीर्यात्मकं भवति, तेषां निष्कर्षात्मकस्तु निर्देश एक एवास्ति यद् 'वर्षासु दधि न भुञ्जीत'। आयुर्वेदज्ञैः सिद्धान्तवत्प्रस्तुता ह्येषा वाक्यरचना ज्ञानाभियोगसंहर्षसंहारकरी वर्तते।**

विगत दिनों में 'व्हाट्स्-एप' इस नाम से विख्यात अथवा दुर्ख्यात शास्त्र में मेरे द्वारा पढ़ा गया कि वर्षाकाल में दही नहीं खाना चाहिए, यह पढ़कर मैंने अन्तर्जालशास्त्र का भी अवगाहन किया, वहाँ पर भी आहार-विशेषज्ञों के द्वारा ऐसा ही लिखा गया है, वहाँ पर आयुर्वेद-चिकित्सकों के द्वारा भी लिखा हुआ है कि वर्षाकाल में दही हानिकारक होता है, इससे आश्चर्यचकित मैंने जो उपदेश पढा वह तो बार-बार अनेक अध्यापकों के द्वारा भी भिन्न-भिन्न लेखों के द्वारा निर्दिष्ट किया गया है। दुःख तो इससे अधिक हुआ क्योंकि अपने नाम से पहले चाकचक्ययुक्त (जगमग करता) 'प्रोफेसर' नामक इस पारिभाषिक विशिष्ट पद को अलङ्कृत करते हुए आयुर्वेद के अध्यापकों के द्वारा यह भी लिखा गया है कि दधि शीत वीर्य वाला होता है, उनका निष्कर्षात्मक निर्देश एक ही है कि 'वर्षाकाल में दधि नहीं खाना चाहिए'। आयुर्वेदज्ञों के द्वारा सिद्धान्त की तरह प्रस्तुत की गई यह वाक्यरचना ज्ञानाभियोग (ज्ञान के प्रति लगाव) और ज्ञान से होने वाले संहर्ष (रोमांच, आनंद) का संहार करने वाली है।

**सुखोपविष्टेन मया मनः पुरःसराभिर्वाग्भिः लेखानेताननुक्रामन् तेषां पुनः पुनरावर्तनं कृतम्, बुद्ध्वा च सम्यगनुप्रविश्यार्थतत्त्वं परदोषपरिहारार्थं आप्तोपदेशप्रमाणार्थं च सुश्रुतसंहितायाः श्लोकोद्धरणार्थस्य विचारः मनसि सञ्जातः, श्लोकस्तु सः -**

**शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितम्।।**
**हेमन्ते शिशिरे चैव वर्षासु दधि शस्यते।।**
(सु.सू.45/80-81) इति ।

सुखपूर्वक बैठे हुए मैंने मन को आगे करके उसके साथ उच्चारण की जाने वाली वाणी से (शब्दोच्चारण से) क्रमबद्ध करते हुए इन लेखों का पुनः पुनः आवर्तन किया (बार-बार दोहराया), इन लेखों में अच्छी प्रकार से प्रवेश करके उनके अर्थतत्त्व को जानकर दूसरों के दोषों के परिहार के लिए और आप्तोपदेश को प्रमाणित करने के लिए सुश्रुतसंहिता के श्लोक के उद्धरण का विचार मन में उत्पन्न हुआ, वह श्लोक तो यह है कि -

शरद्, ग्रीष्म एवं वसन्त ऋतुओं में प्रायः दही का प्रयोग निन्दित है तथा हेमन्त में, शिशिर में एवं वर्षा

में दधि प्रशस्त माना जाता है (श्रेष्ठ माना जाता है)।

**अत्र 'गर्हितम्- शस्यते' इति शब्दद्वयेन सर्वं स्पष्टं जातम्, एतौ शब्दौ स्वार्थतत्त्वप्रभावयोः प्रदर्शकौ स्त इति तु जानन्ति शब्दकोविदाः।**

**दधिप्रयोगनिषेधप्रसङ्गे महर्षिश्चरकोऽपि निगदति यत्-**

**शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितम्।**
**रक्तपित्तकफोत्थेषु विकारेष्वहितं च तत्।।**

(च.सू.27/227)

यहाँ पर 'गर्हितम् एवं शस्यते' इन दो शब्दों से सब कुछ स्पष्ट हो गया, ये दो शब्द अपने अर्थतत्त्व के प्रभाव के प्रदर्शक हैं यह तो शब्द विशेषज्ञ जानते हैं।

दधिप्रयोग के निषेध के प्रसङ्ग में महर्षि चरक भी कहते हैं कि –

शरद्, ग्रीष्म एवं वसन्त इन ऋतुओं में प्रायः दही का प्रयोग निन्दित है। रक्त से, पित्त से एवं कफ से होने वाले विकारों में वह दही अहित है।

**संहितासु यत्किमपि निर्दिष्टं न तद्यदृच्छया, अपितु तद्बहुभिः परीक्षकैःपरीक्षितम्, निर्दिशत्या-चार्यश्चरकःप्रसङ्गेऽस्मिन्यत् –**

**सिद्धान्तो नाम स यः परीक्षकैर्बहुविधं परीक्ष्य हेतुभिश्च साधयित्वा स्थाप्यते निर्णयः।** (च.वि. 8/37)

संहिताओं में जो कुछ भी कहा गया है वह सब कुछ यदृच्छा (स्वेच्छा, मनमर्जी) से नहीं कहा गया है, अपितु अनेक परीक्षकों के द्वारा परीक्षित है, आचार्य चरक इस प्रसङ्ग में कहते हैं कि –

सिद्धान्त वह है जो परीक्षकों के द्वारा अनेक प्रकार से परीक्षण करके अनेक हेतुओं से उसे सिद्ध करके जो निर्णय स्थापित किया जाता है।

**एतदतिरिक्तं समये समये व्याख्याकारैरपि तेषां संहितासु निर्दिष्टानां संस्थापितसिद्धान्तानां युगानुरूपसन्दर्भे विश्लेषणं कृत्वा सम्पोषणं कृतम्। 'वर्षासु दधि न भुञ्जीत' इति तु न केनापि व्याख्याकारेण कथितम्। संहितासु दध्नः वीर्यमप्युष्णमेवोल्लिखितम्वर्तते। युगे-युगे हि वृद्धवैद्यैरपि चिकित्साप्रसङ्गे व्यवहारे च यत्किमपि दृष्टं तत्तु स्वानुभवकथनप्रसङ्गे स्पष्टरूपेण कथितम्, सहैव च तैर्विश्लेषणमपि कृतम्, परिणामकथनप्रसङ्गे प्रमाणपुरःसराणां हेतूनां प्रयोगप्रक्रिया अपि च ते कथयन्ति स्म। अधुनापि वृद्धवैद्याः वैज्ञानिकाश्चाप्येवमेव कुर्वन्ति, न तु यदृच्छया किमपि कथयन्ति।**

इसके अतिरिक्त समय-समय पर व्याख्याकारों के द्वारा भी उन संहिताओं में निर्दिष्ट संस्थापित सिद्धान्तों का युगानुरूपसन्दर्भ में विश्लेषण करके सम्पोषण किया गया है। 'वर्षा में दधि नहीं खाना चाहिए' यह तो किसी भी व्याख्याकार के द्वारा नहीं कहा गया। संहिताओं में दही का वीर्य भी उष्ण ही उल्लिखित है। निश्चित रूप से इसके साथ ही उन्होंने विश्लेषण भी

किया है। परिणाम के कहने के प्रसङ्ग में प्रमाणसहित हेतुओं को तथा प्रयोग प्रक्रियाओं को भी वे कहते थे। वर्तमान में भी वृद्धवैद्य एवं वैज्ञानिक भी ऐसा ही करते हैं, स्वेच्छा से कुछ भी नहीं कहते हैं।

**सम्भवतः व्हाट्स-एप इत्यत्र 'वर्षासु दधि न भुञ्जीत' इति त्वेकेन केनापि यदृच्छया कथितम्, अन्यैस्तु तस्यानुकरणं कृतम्, इति प्रतीयते। अथवा येन केनापि यत्र-तत्र कस्मिंश्चिज्जने जनेषु वा परिस्थितिविशेषे स्थानविशेषे वाऽथवा प्रदेशविशेषे दधिप्रयोगपरिणामः दृष्टः, स एव लिखितः, किन्तु न सः सिद्धान्तः। आचार्यश्चरकः कस्मिंश्चिदन्यस्मिन् प्रसङ्गे कथयति यत् –**

**न हि.......अवयवप्रभावानुमानेनैव समुदायप्रभावतत्त्वमध्यवसातुं शक्यम्॥** (च.वि. 1/11)।

सम्भवतः व्हाट्स एप पर 'वर्षा में दधि नहीं खाना चाहिए' यह तो किसी एक के द्वारा स्वेच्छा से कह दिया गया और अन्य लोगों के द्वारा उसका अनुकरण किया गया है, ऐसा प्रतीत होता है अथवा जिस किसी भी एक व्यक्ति के द्वारा जहाँ-तहाँ किसी एक व्यक्ति में अथवा व्यक्तियों में स्थितिविशेष में अथवा स्थानविशेष में अथवा प्रदेशविशेष में दही के प्रयोग का परिणाम देखा गया और वही लिख दिया गया, लेकिन वह सिद्धान्त नहीं है, आचार्य चरक किसी अन्य प्रसङ्ग में कहते हैं कि अवयव (किसी एक अंश) के प्रभाव के अनुमान से ही समुदाय के प्रभाव के तत्त्व को (वस्तुस्थिति को) नहीं जाना जा सकता है।

**'अन्तर्जाल (Internet)' इत्यत्रैव च केचिदुद्धरन्ति यत् लोकोक्तिकारकः स्वानुभवसिद्धः ज्ञानवृद्धः 'घाघ' इति नाम्ना प्रसिद्धः समादृतः जनः कथयति यत्- 'सावन साग न भादो दही'। अत एव 'वर्षासु दधि न भुञ्जीत'। किन्त्वत्र घाघमहोदयेनापि 'वर्षासु दधि न भुञ्जीत' इति तु न कथितं न च सङ्केतितम्। तेनापि 'भाद्रपदमासे' दधि न भक्षयेदिति कथितम्।**

'अन्तर्जाल (Internet)' पर ही कुछ लोग उद्धृत करते हैं कि लोकोक्तिकारक, स्वानुभवसिद्ध, ज्ञानवृद्ध 'घाघ' इस नाम से प्रसिद्ध एवं अत्यन्त ही आदर किया गया व्यक्ति कहता है कि- 'सावन साग न भादो दही'। इसलिए 'वर्षा में दधि नहीं खाना चाहिए'। लेकिन यहाँ पर घाघमहोदय के द्वारा भी 'वर्षा में दधि नहीं खाना चाहिए' यह न तो कहा गया है और नही संकेतित किया गया है। उन्होंने भी 'भाद्रपदमास' में दधि नहीं खाना चाहिए यही कहा है।

**वर्षाकालस्त्वाषाढमासत एव प्रारभ्यते, श्रावण-मासे तु विशेषेण वर्षति पर्जन्यः। तत्र तु घाघमहोदयेनापि निषेधो न कृतः। सुश्रुतसंहितायां सप्त दधिप्रकाराः निर्दिष्टाः, तेषु सामान्यतया वर्षाकाले केवलस्य मधुरस्यैव दध्नः प्रयोगोऽभीष्टोऽस्ति। घाघमहोदयेन कीदृग्विधं**

**दधि भाद्रपदमासे निषिद्धमिति तु विश्लेषण-योग्यो विषयोऽस्ति, यद्यपि भाद्रपदमासस्योत्तरे काले तु क्रमशः दधिप्रयोगं विरमेदिति तु शास्त्रसम्मतम्। शास्त्रे तु सर्वमिदं व्यासतः निर्दिष्टम्, अत्र त्वेतदेव वर्णनं पर्याप्तम्।**

वर्षाकाल तो आषाढमास से ही प्रारम्भ हो जाता है, श्रावणमास में तो बादल विशेष रूप से बरसते हैं उसमें (श्रावण मास में) घाघमहोदय के द्वारा भी निषेध नहीं किया गया है। सुश्रुतसंहिता में दही के सात प्रकार निर्दिष्ट किए गए हैं, उन में सामान्यतया वर्षाकाल में केवल मीठे दही का प्रयोग ही अभीष्ट है। घाघमहोदय के द्वारा किस प्रकार का दधि भाद्रपदमास में निषिद्ध किया गया है यह तो विश्लेषणयोग्य विषय है, यद्यपि **भाद्रपदमास के उत्तरकाल में तो क्रमशः दधिप्रयोग को विराम देते हैं,** वह तो शास्त्रसम्मत है। शास्त्र में तो यह सब कुछ विस्तार से बताया गया है, यहाँ तो इतना ही वर्णन पर्याप्त है।

**असारे खलु संसारे सारमेतन्निहितं यदायुः कामयमानेन जनेन स्ववासस्थानं देशं वा कालस्थितिं स्वरूपञ्च सुविचार्यैवाहारद्रव्याणां प्रयोगः करणीयः। तत्रापि च शास्त्रनिर्देशाः वृद्धानाञ्च निर्देशाः स्थानविशेष एव परिपालनीयाः, संक्षेपेणैतदेव कथनं पर्याप्तं यद् वर्तमानकाले 'इण्टरनेट' इत्यस्य प्रभावस्तु सर्वत्र समानरूपेण दृश्यते तत्र तु देशकालादीनामपेक्षा न वर्तते, किन्तु द्रव्यन्तु जनस्य प्रकृतिं देशकालादींश्चापेक्षत एव ।अत एव येषां कृते दधि सात्म्यमस्ति तैस्तु वर्षाकालेऽपि दधिसेवनं कर्तव्यम्, किन्तु विधिपूर्वकमेव सेवनं समुचितमिति तूपरि संक्षेपेण निर्दिष्टम्। येषां कृते दधि सात्म्यं नास्ति तैस्तु कदाचिदपि दधिसेवनं न कर्तव्यम्। अत एवशास्त्रसम्मतं ह्येतद्वचनं यद् 'वर्षासु दधि भुञ्जीत'।**

साररहित इस संसार में आयु की कामना करने वाला व्यक्ति अपना वासस्थान, देश अथवा काल की स्थिति और उसके स्वरूप का अच्छी प्रकार से विचार करके ही आहार-द्रव्यों का प्रयोग करे। इसमें भी शास्त्र के निर्देश, वृद्ध व्यक्तियों के निर्देश का परिपालन स्थानविशेष पर ही किया जाना चाहिए। संक्षेप में यही कथन पर्याप्त है कि वर्तमानकाल में 'इण्टरनेट' का प्रभाव तो सर्वत्र समान रूप से देखा जाता है उसमें तो देश-काल इत्यादि की अपेक्षा नहीं होती है किन्तु द्रव्य तो व्यक्ति की प्रकृति और देश-काल इत्यादि की अपेक्षा करता ही है। इसलिए जिन व्यक्तियों के लिए दधि सात्म्य है उन्हें तो वर्षाकाल में भी दधिसेवन करना चाहिए किन्तु दही का विधिपूर्वक सेवन ही उपयुक्त रहता है, यह तो ऊपर संक्षेप में निर्दिष्ट कर दिया गया है। जिन व्यक्तियों के लिए दधि सात्म्य नहीं है उनको तो कभी भी दही का सेवन नहीं करना चाहिए, इसलिए यह वचन शास्त्रसम्मत है कि 'वर्षाकाल में दधि खाना चाहिए'।

प्रेषण-प्रत्येक माह की ५ तारीख आर.एम.एस. ( पी.एस.ओ. ) जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2024-26




स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः प्रोफेसर बनवारीलालगौडः, प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाषः ०१४१-२३७९०१४

प्रतिष्ठायाम्,